तन॥२१॥उदुत्वाविश्वेदेवाअग्नेभरंतुचित्तिभिः॥सनोभवशिवस्त्वं
सुप्रतीकोविभावसुः॥२२॥प्रेदग्नेज्योतिष्मान्याहिशिवेभिरर्चिभिष्ट्वम्॥
बृहद्भिर्भानुभिर्भासन्माहिंसीस्तन्वाप्रजाः॥२३॥अक्रंददग्निस्तनयन्नि
वद्यौःक्षामारेरिहद्वीरुधःसमंजन्॥सद्योजज्ञानोविहीमिद्धोअख्यदारो
दसीभानुनाभात्यंतः॥२४॥प्रप्रायमग्निर्भरतस्यशृण्वेवियत्सूर्योनरोचते

ष्टहस्राः॥ अभिप्रयः पूरुं पत्तनासुतस्थौ दीदायद्दैव्यो अतिथिः शिवोनः॥३५
आपोदेवीः प्रतिगृभ्णीतभस्मैतत्स्योनेकृणुध्वंसुरभाउलोके।तस्मै
नमंतांजनयः सुपत्नीर्मातेवपुत्रंबिभृताप्स्वेनत्॥३६॥ अप्स्वग्नेसधिष्टव
सौषधीरनुरुध्यसे। गर्भेसंजायसेपुनः॥ गर्भोअस्योषधीनांगर्भोवन
स्पतीनां॥ गर्भोविश्वस्यभूतस्याग्नेगर्भोअपामसि॥३८॥ प्रसद्यभस्म
नायोनिमपश्चपृथिवीमग्ने। संसृज्यमातृभिष्ट्वंज्योतिष्मान्पुनरास
दः॥३९॥ पुनरासद्यसदनमपश्चपृथिवीमग्ने। शेषेमातुर्यथोपस्थेंत
रस्यांशिवतमः॥४०॥ पुनरूर्जानिवर्त्तस्वपुनरग्नइषायुषा। पुनर्नःपा
ह्यंहसः॥४१॥ सहरय्यानिवर्त्तस्वाग्नेपिंन्वस्वधारया॥ विश्वपस्न्याविश्व

स्म ल:सैपि॥४१॥ बोधा मे अस्य वचसो यविष्ठ मंहिष्ठस्य प्रभृतस्य स्वधावः॥ पी
यति त्वो अनु त्वो गृणाति वंदारुष्टे तन्वं वंदे अग्ने॥४२॥ स बोधि सूरिर्मघवा
वसुपते वसुदावन्॥ युयोध्यस्मद्द्वेषांसि विश्वकर्मणे स्वाहा॥४४॥ पुनस्त्वा
दित्या रुद्रा वसवः समिंधतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः॥ घृतेन त्वं तन्वं वर्द्ध
यस्व सत्याः संतु यजमानस्य कामाः स्वाहा॥४५॥ अपेत वीत वि च सर्पतातो
येत्र स्थ पुराणा ये च नूतनाः॥ अदाद्यमोवसानं पृथिव्या अक्रन्निमं पितरो
लोकमस्मै॥४६॥ संज्ञानमसि कामधरणं मयि ते कामधरणं भूयात्॥ अग्ने
र्भस्मास्यग्नेः पुरीषमसि॥ चित स्थ परिचित ऊर्ध्वचितः श्रयध्वं॥४७॥ अय
सो॰ ꣳसो अग्निर्यस्मिन्सोममिंद्रः सुतं दधे जठरे वावशानः॥ सहस्रियं वाजमत्यं

नसप्तिꣳसस्रवान्सन्स्तुषेसेजातवेदः॥४८॥ अग्नेयत्तेदिविवर्च्चः पृथिव्यांय
दोषधीष्वप्स्वायजत्र॥ येनांतरिक्षमुर्व्वाततंथत्वेषः सभानुरर्णवोनृचक्षाः॥
४९॥ अग्नेदिवोऽअर्णमच्छाजिगास्यच्छादेवांऽऊचिषेधिष्ण्याये॥ यारोच
नेपरस्तात्सूर्यस्ययाश्चावस्तादुपतिष्ठंतऽआपः॥५०॥ पुरीष्यासोऽअ
ग्नयः प्रावुणेभिः सजोषसः॥ जुषंतांयज्ञमद्रुहोनमीवाऽइषोमहीः॥५१॥
इडामग्नेपुरुदꣳसꣳसनिंगोः शश्वत्तमꣳहवमानायसाध॥ स्यान्नःसूनुस्तन
योविजावाग्नेसातेसुमतिर्भूत्वस्मे॥५२॥ अयंतेयोनिर्ऋत्वियोयतोजातोऽ
अरोचथाः॥ तंजानन्नग्नऽआरोहाथानोवर्द्धयारयिम्॥५३॥ चिदसितयादे
वतयांगिरस्वद्ध्रुवासीद॥ परिचिदसितयादेवतयांगिरस्वद्ध्रुवासीद॥५४
लोकंपृणछिद्रंपृणाथोसीदध्रुवात्वं॥ इन्द्राग्नी॥ त्वाबृहस्पतिरस्मिन्योनाऽअ

सीषदन्॥५५॥ ताऽअस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः॥ जन्मन्देवानां वि
शस्त्रिष्वारोचने दिवः॥५६॥ इन्द्रं विश्वाऽअवीवृधन्त्समुद्रव्यचसं गिरः॥ रथी
तमꣳ रथीनां वाजानाꣳ सत्पतिं पतिं॥५७॥ समितꣳ संकल्पेथाꣳ संप्रियौ
रोचिष्णू सुमनस्यमानौ॥ इषमूर्जमभिसंवसानौ॥५८॥ सं वां मनाꣳसि सं
व्रतासमुचित्तान्याकरं॥ अग्ने पुरीष्याधिपा भव त्वन्नः॥ इषमूर्जं यजमाना
य धेहि॥५९॥ अग्ने त्वं पुरीष्यो रयिमान्पुष्टिमाँऽअसि॥ शिवाः कृत्वा दिशः
सर्वाः स्वं योनिमिहासदः॥६०॥ भवतन्नः समनसौ सचेतसावरेपसौ॥
मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः॥६१॥
मातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योनावभारुखा॥ तां विश्वैर्देवै

र्ऋतुभिः संविदानोः प्रजापतिर्विश्वकर्मा विमुंचतु ॥ ६२ ॥ असुन्वंतमयजमा त
नमिच्छस्तेनस्येत्यामन्विहि तस्करस्य ॥ अन्यमस्मदिच्छ सा त इत्या नमो
देवि निर्ऋते तुभ्यमस्तु ॥ ६३ ॥ नमः सु ते निर्ऋते तिग्मतेजोयस्मयं विचृता
११ बंधमेतं ॥ यमेन त्वं यम्या संविदानोत्तमे नाके अधिरोहयेनम् ॥ ६४ ॥ य
स्यास्ते घोर आसन्जुहोम्येषां बंधनामवसर्जनाय ॥ यां त्वा भूमिरिति प्र जनो
मंदते निर्ऋतिं त्वाहं परि वेद विश्वतः ॥ ६५ ॥ यंते देवी निर्ऋतिराबबंध पाशं
ग्रीवास्वविचृत्यं ॥ तं ते विष्याम्यायुषो न मध्यादथैतं पितुमद्धि प्रसूतः ॥ न १९
मो भूत्यै येदं चकार ॥ ६६ ॥ निवेशनः संगमनो वसूनां विश्वा रूपाभि चष्टे
शचीभिः ॥ देव इव सविता सत्यधर्मेंद्रो न तस्थौ समरे पथीनाम् ॥ ६७

सीरायुंजंतिकवयोयुगाविंतन्वतेपृथक् ।धीरादेवेषुसुम्नया ॥६७॥ युनक्त
सीराविंयुगातनुध्वंकृतेयोनौवपतेहबीजम् ।गिराचश्रुष्टिःसभराऽअस
न्नोनेदीयऽइत्सृण्यःपक्वमेयात् ॥६८॥ शुनꣳसुफालाविकृषंतुभूमिꣳशु
नंकीनाशाऽअभियंतुवाहैः ॥ शुनासीराहविषातोशमानासुपिप्पलाऽओ
षधीःकर्त्तनास्मे ॥६९॥ घृतेनसीतामधुनासमज्यतांविश्वैर्देवैरनुमताम
रुद्भिः ॥ ऊर्जस्वतीपयसापिन्वमानास्मान्सीतेपयसाभ्याववृत्स्व ॥७०॥
लांगलंपवीरवंसुशेवꣳसोमपित्सरु ।तदुद्वपतिगामविंप्रफर्व्यंचपी
वरींप्रस्थावद्रथवाहनम् ॥७१॥ कामंकामदुघेधुक्ष्वमित्रायवरुणायच ।
इंद्रायाश्विभ्यांपूष्णेप्रजाभ्यऽओषधीभ्यः ॥७२॥ विमुच्यध्वमघ्न्यादेवयाना

ऽअगन्मुतमसस्यारमस्याऽज्योतिरापाम॥७४॥सजूरब्दोऽअयवोभिःस
जूरुषाऽअरुणीभिः॥सजोषसाऽअश्विनादꣳसोभिःसजूःसूरऽएतशेन
सजूर्वैश्वानरऽइडयाघृतेनस्वाहा॥७५॥याऽओषधीःपूर्वाजातादेवे
भ्यस्त्रियुगंपुरा॥मनेनुबभ्रूणामहꣳशतंधामानिसप्तच॥७६॥शतंवोऽ
अंबधामानिसहस्रमुतवोरुहः॥अधाशतक्रत्वोयूयमिमंमेऽअगदंकृ
त॥७७॥ओषधीःप्रतिगृभ्णीतपुष्पवतीःप्रसूवरीः॥अश्वाऽइवसजि
त्वरीर्वीरुधःपारयिष्णवः॥७८॥ओषधीरितिमातरस्तद्वोदेवी
रुपब्रुवे॥सनेयमश्वंगांवासऽआत्मानंतवपूरुष॥७९॥अश्वत्थेवोनि
षदनंपर्णेवोवसतिष्कृता॥गोभाजऽइत्किलासथयत्सनवथपूरुषं॥८०॥

यत्रोषधीःसमग्मतराजानःसमिताऽइव॥विप्रसउच्यतेभिषग्रक्षोहामीव
चातनः॥८१॥अश्वावतीँसोमावतीमूर्ज्जयंतीमुदोजसम्॥आवित्सि
सर्वाऽओषधीरस्माऽअरिष्टतातये॥८२॥उच्छुष्माऽओषधीनांगावोगो
ष्ठादिवेरते॥धनँसनिष्यंतीनामात्मानंतवपूरुष॥८३॥इष्कृतिर्नाम
वोमाताथोयूयँस्थनिष्कृतीः॥सीराःपतत्रिणीस्थनयदामयतिनिष्कृ
थ॥८४॥अतिविश्वाःपरिष्ठास्तेनःइवव्रजमक्रमुः॥ओषधीःप्राचुच्यवु
र्यत्किंचतन्वोरपः॥८५॥यदिमावाजयन्नहमोषधीर्हस्तऽआदधे॥आ
त्मायक्ष्मस्यनश्यतिपुराजीवगृभोयथा॥८६॥यस्योषधीःप्रसर्पथांग
मंगंपरुष्परुः॥ततोयक्ष्मंविबाधध्वउग्रोमध्यमशीरिव॥८७॥साकंय

क्ष्म प्रपत चाषेण किकिदीविना ।। साकं वातस्य ध्राज्या साकं नस्य निहाकया ।।
१३ ।। अन्या वो अन्यामवत्वन्यान्यस्या उपवत ।। ताः सर्वाः संविदाना इदं मे प्रा
वता वचः ।।१४।। याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।। बृहस्प
तिप्रसूतास्ता नो मुंचंत्वंहसः ।।१५।। मुंचंतु मा शपथ्यादथो वरुण्यादुत ।।
अथो यमस्य पड्वीशात्सर्वस्माद्देवकिल्बिषात् ।।१६।। अवपतंतीः समवदंत
दिव ओषधयस्परि ।। यं जीवमश्नवामहै न स रिष्याति पूरुषः ।।१७।। या ओ
षधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः ।। तासां त्वमस्युत्तमारं कामाय शं
हृदे ।।१८।। या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु ।। बृहस्पतिप्रसू
ता अस्यै संदत्त वीर्यं ।।१९।। याश्चेदमुपशृण्वंति याश्च दूरं परागताः ।। सर्वाः

संगत्यवीरुधोस्यैसंदत्तवीर्यं ॥९५॥ नाशयित्रीबलासस्यार्शसउपचिताम
सि ॥ अथोशतस्ययक्ष्माणांपाकारोरसिनाशनी ॥९६॥ मावोरिषत्खनिताय
स्मैचाहंखनामिवः ॥ द्विपच्चतुष्पदस्माकंसर्वमस्त्वनातुरं ॥९७॥ ओषधयः
संवदंतेसोमेनसहराज्ञा ॥ यस्मैकृणोतिब्राह्मणस्तंराजन्पारयामसि ॥९८
त्वांगंधर्वाऽअखनंस्त्वामिंद्रस्त्वांबृहस्पतिः ॥ त्वामोषधेसोमोराजाविद्वान्यक्ष्मा
दमुच्यत ॥९९॥ त्वमुत्तमास्योषधेतववृक्षाउपस्तयः ॥ उपस्तिरस्तुसोस्माकंयोऽ
अस्माँऽअभिदासति ॥१००॥ मामाहिंसीज्जनितायःपृथिव्यायोवादिवंस
त्यधर्माव्यानट् ॥ यश्चापश्चंद्राःप्रथमोजजानकस्मैदेवायहविषाविधेम ॥१०१
अभ्यावर्तस्वपृथिवियज्ञेनपयसासह ॥ वपांतेऽअग्निरिषितोऽअरोहत् ॥१०२॥
अग्नेयत्तेशुक्रंयच्चंद्रंयत्पूतंयच्चयज्ञियं ॥ तद्देवेभ्योभरामसि ॥१०३॥ इषमूर्जम

हमितः ऽ आदमृतस्य योनिं महिषस्य धारां॥ आमा गोषु विशत्वा तनूषु जहामि से
दिमनिराममीवां॥१०४॥ अग्ने तव श्रवो वयो महि भ्राजन्ते ऽ अर्चयो विभावसो॥
बृहद्भानो शवसा वाजमुक्थ्यं दधासि दाशुषे कवे॥१०५॥ पावकवर्चाः शुक्रवर्चा
ऽ अनूनवर्चा ऽ उदियर्षि भानुना॥ पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोद
सी ऽ उभे॥१०६॥ ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभिर्हितः॥ त्वे ऽ इषः
सं दधुर्भूरिवर्पसश्चित्रोतयो वामजाताः॥१०७॥ इरज्यन्नग्ने प्रथयस्व जन्तुभि
रस्मे रायो ऽ अमर्त्य॥ स दर्शतस्य वपुषो विराजसि पृणक्षि सानसिं क्रतुं॥१०८॥
इष्कर्त्तारमध्वरस्य प्रचेतसं क्षयन्तꣳ राधसो महः॥ रातिं वामस्य सुभगां मही
मिषं दधासि सानसिꣳ रयिं॥१०९॥ ऋतावानं महिषं विश्वदर्शतमग्निꣳ सु
म्नाय दधिरे पुरो जनाः॥ श्रुत्कर्णꣳ सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा॥११०

आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यं॥भवावाजस्यसंगथे॥११॥संतेपया
ꣳसिसमुयंतुवाजाःसंवृष्ण्यान्यभिमातिषाहः॥आप्यायमानोऽअमृताय
सोमदिविश्रवाꣳस्युत्तमानिधिष्व॥१२॥आप्यायस्वमदिंतमसोमविश्वेभिरꣳ
शुभिः॥भवानःसप्रथस्तमःसखावृधे॥१३॥आतेवत्सोमनोयमत्परमाच्चि
त्सधस्थात्॥अग्नेत्वांकामयागिरा॥१४॥तुभ्यंताऽअंगिरस्तमविश्वाःसुक्षि
तयःपृथक्॥अग्नेकामाययेमिरे॥११५॥अग्निःप्रियेषुधामसुकामोभूतस्य
भव्यस्य॥सम्राळेकोविराजति॥११६॥इतिसंहितायांयजुर्वेदेत्रयोदशोध्या
यः॥छ॥छ॥छ॥छ॥छ॥छ॥हरिःॐ३म॥मयिगृह्णाम्यग्रे॥अग्निꣳराय
स्पोषायसुप्रजास्त्वायसुवीर्याय॥मामुदेवताःसंचंताम्॥१॥अपांपृष्ठमसि

योनिरग्नेः समुद्रमभितः पिन्वमानं॥ वर्द्धमानोमहांऽआचपुष्करेदिवोमात्र
यावरिम्णाप्रथस्व॥२॥ ब्रह्मजज्ञानप्रथमंपुरस्ताद्विसीमतः सुरुचोवेनऽआ
वः॥ सबुध्न्याऽउपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्चविवः॥३॥ हिरण्य
गर्भः समवर्त्तताग्रेभूतस्यजातः पतिरेकऽआसीत्॥ सदाधारपृथिवींद्यामु
तेमांकस्मैदेवायहविषाविधेम॥४॥ द्रप्सश्चस्कंदपृथिवीमनुद्यामिमंच
२२ योनिमनुयश्चपूर्वः॥ समानंयोनिमनुसंचरंतंद्रप्संजुहोम्यनुसप्तहोत्राः॥५
नमोस्तुसर्पेभ्योयेकेचपृथिवीमनु॥ येऽअंतरिक्षेयेदिवितेभ्यः सर्पेभ्योनमः॥ २२
६॥ याऽइषवोयातुधानानांयेवावनस्पतीं२रनु॥ येवावटेषुशेरतेतेभ्यःस
र्पेभ्योनमः॥७॥ येवामीरोचनेदिवोयेवासूर्यस्यरश्मिषु॥ येषामप्सुसद

स्कृतं तेभ्यः सर्पेभ्यो नमः॥८॥ कृणुष्व पाजः प्रसितिन्न पृथ्वीं याहि राजेवामवाँ इभेन। तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः॥९॥ तव भ्रमास आशुया पतंत्यनु स्पृश धृषता शोशुचानः॥ तपूंष्यग्ने जुह्वा पतंगानसंदितो विसृज विष्वगुल्काः॥१०॥ प्रति स्पशो विसृज तूर्णितमो भवा पायुर्विशोऽअस्याऽअदब्धः। यो नो दूरेऽअघशंसो योऽअंत्यग्ने माकिष्टे व्यथिरादधर्षीत्॥११॥ उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्राँऽओषतात्तिग्महेते। यो नोऽअरातिं समिधान चक्रे नीचा तं धक्ष्यतसन्न शुष्कम्॥१२॥ ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने। अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्र मृणीहि शत्रून्॥१३॥ अग्निष्टा तेजसा सादयामि॥ अ

ग्निर्मूर्द्धादिवःककुत्पतिःपृथिव्याःअयम्॥अपाꣳरेताꣳसिजिन्वति॥
इंद्रस्यत्वौजसासादयामि॥१४॥भुवोयज्ञस्यरजसश्चनेतायत्रानियुद्भिः
सचसेशिवाभिः॥दिविमूर्द्धानंदधिषेस्वर्षाञ्जिह्वामग्नेचकृषेहव्यवाहं॥
१५॥ध्रुवासिधरुणास्तृताविश्वकर्मणा॥मात्वासमुद्रउद्वधीन्मासुप
र्णोव्यथमानापृथिवींदृꣳह॥१६॥प्रजापतिष्ट्वासादयत्वपांपृष्ठेसमुद्र
स्येमन्॥व्यचस्वतींप्रथस्वतींप्रथस्वपृथिव्यसि॥१७॥भूरसिभूमिरस्य
दितिरसिविश्वधायाविश्वस्यभुवनस्यधर्त्री॥पृथिवींयच्छपृथिवींदृꣳह
पृथिवींमाहिꣳसीः॥१८॥विश्वस्मैप्राणायापानायव्यानायोदानायप्र
तिष्ठायैचरित्राय॥अग्निष्ट्वाभिपातुमह्यास्वस्त्याछर्दिषाशंतमेनतया

देवतयांगिरस्वध्रुवासीद॥१९॥कांडात्कांडात्प्ररोहंतीपरुषःपरुषस्परि॥ए
वानोदूर्वेप्रतनुसहस्रेणशतेनच॥२०॥याशतेनप्रतनोसिसहस्रेणविरो
हसि॥तस्यास्तेदेवीष्टकेविधेमहविषावयम्॥२१॥यास्तेअग्नेसूर्येरुचोदि
वमातन्वंतिरश्मिभिः॥ताभिर्नोऽअद्यसर्वाभीरुचेजनायनस्कृधि॥२२॥यावो
देवाःसूर्येरुचोगोष्वश्वेषुयारुचः॥इंद्राग्नीताभिःसर्वाभीरुचंनोधत्तबृहस्प
ते॥२३॥विराड्ज्योतिरधारयत्स्वराड्ज्योतिरधारयत्॥प्रजापतिष्ट्वासादय
तुपृष्ठेपृथिव्याज्योतिष्मतीम्॥२४॥विश्वस्मैप्राणायापानायव्यानायवि
श्वंज्योतिर्यच्छ॥अग्निष्टेधिपतिस्तयादेवतयांगिरस्वध्रुवासीद॥२५॥म
धुश्चमाधवश्चवासंतिकावृतू॥अग्नेरंतःश्लेषोसि॥कल्पेतांद्यावापृथिवी

कल्पंतामापःऽओषधयः कल्पंतामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः॥ येऽअ
ग्नयः समनसोंतरा द्यावापृथिवीऽइमे॥ वासंतिकाऽऋतूऽअभिकल्पमाना॥
इंद्रमिव देवाऽअभिसंविशंतु तया देवतयांगिरस्वद्ध्रुवे सीदतम्॥२६॥ अषाढा
सि सहमाना सहस्वारातीः सहस्व पृतनायतः॥ सहस्रवीर्यासि सा मा जिन्व॥
२७॥ सहस्व माऽअभिमातीः सहस्व पृतनायतः॥ सहस्व सर्वं पाप्मानꣳ सहमा
नास्योषधे॥२८॥ मधु वाताऽऋतायते मधु क्षरंति सिंधवः॥ माध्वीर्नः संत्वोष
धीः॥२९॥ मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः॥ मधु द्यौरस्तु नः पिता॥३०॥
मधुमान्नो वनस्पतिर्मधुमाꣳऽअस्तु सूर्यः॥ माध्वीर्गावो भवंतु नः॥३१॥ अपां
गंभन्सीद मा त्वा सूर्योऽभिताप्सीन्माग्निर्वैश्वानरः॥ अच्छिन्नपत्राः प्रजाऽअ

नुवीक्षस्वानुत्वादिव्यावृष्टिःसचतां॥२२॥त्रीन्समुद्रान्समसृपत्स्वर्गानपां
पतिर्वृषभऽइष्टकानां॥पुरीषंवसानःसुकृतस्यलोकेतत्रगच्छयत्रपूर्वेपरे
ताः॥२३॥महीद्यौःपृथिवीचनऽइमंयज्ञंमिमिक्षतां॥पिपृतांनोभरीमभिः॥
२४॥विष्णोःकर्म्माणिपश्यतयतोव्रतानिपस्पशे॥इंद्रस्ययुज्यःसखा॥
२५॥ध्रुवासिधरुणास्तोजनिष्टप्रथमेभ्योयोनिभ्योऽअधिजातवेदाः॥स
य गायत्र्यात्रिष्टुभानुष्टुभाचदेवेभ्योहव्यंवहतुप्रजानन्॥२६॥इषेरायेर
मस्वसहसेद्युम्नऽऊर्जेऽअपत्याय॥संम्राळसिस्वराळसिसारस्वतौ
त्वोत्सौप्रावतां॥२७॥अग्नेयुक्ष्वाहियेतवाश्वासोदेवसाधवः॥अरं
वहंतिमन्यवे॥२८॥युक्ष्वाहिदेवहूतमांऽअश्वांऽअग्नेरथीरिव॥निहो

लापृथ्व्येस्सदः॥३९॥सम्यक्स्रवंतिसरितोनधेनाःअंतर्हृदामनसापू
यमानाः॥घृतस्यधाराःअभिचाकशीमिहिरण्ययोवेतसोमध्येःअ
ग्नेः॥४०॥ऋचेत्वारुचेत्वाभासेत्वाज्योतिषेत्वा॥अभूदिदंविश्वस्य
भुवनस्यवाजिनमग्नेर्वैश्वानरस्यच॥४१॥अग्निर्ज्योतिषाज्योति
ष्मान्रुक्मोवर्चसावर्चस्वान्॥सहस्रदाःअसिसहस्रायत्वा॥४२॥
आदित्यंगर्भंपयसासमंग्धिसहस्रस्यप्रतिमांविश्वरूपं॥परिवृङ्धि
हरसामाभिमंस्थाःशतायुषंकृणुहिचीयमानः॥४३॥वातस्यजूतिं
वरुणस्यनाभिमश्वंजज्ञानंसरिरस्यमध्ये॥शिशुंनदीनांहरिम
द्रिबुध्नमग्नेमाहिंसीःपरमेव्योमन्॥४४॥अजस्रमिंदुमरुषंभुरण्यु

मग्निमीळेपूर्वचित्तिन्नमोभिः॥सपर्वभिर्ऋतुशःकल्पमानोगांमाहिꣳसीरदि
तिंविराजम्॥४५॥वरूत्रींत्वष्टुर्वरुणस्यनाभिमविंजज्ञानाꣳरजसःपरस्मात्।
महीꣳसाहस्रीमसुरस्यमायामग्नेमाहिꣳसीःपरमेव्योमन्॥४६॥योऽअग्नि
रग्नेरध्यजायतशोकात्पृथिव्याऽउतवादिवस्परि॥येनप्रजाविश्वकर्माजजा
नतमग्नेहेळःपरितेवृणक्तु॥४७॥चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्य
वरुणस्याग्नेः॥आप्राद्यावापृथिवीऽअंतरिक्षꣳसूर्यऽआत्माजगतस्तस्थु
षश्च॥४८॥इमंमाहिꣳसीर्द्विपादंपशुꣳसहस्राक्षोमेधायचीयमानः।म
युंपशुंमेधमग्नेजुषस्वतेनचिन्वानस्तन्वोनिषीद।मयुंतेशुगृच्छतुयंद्विष्म
स्तंतेशुगृच्छतु॥४९॥इमंमाहिꣳसीरेकशफंपशुंकनिक्रदंवाजिनंवाजिनेषु।

घोरमारण्यमनुतेदिशामितेनचिन्वानस्तन्वोनिषीद।घोरंतेशुगृच्छतुयंद्विष्म
स्तंतेशुगृच्छतु॥५०॥इमꣳसाहस्रꣳशतधारमुत्संव्यच्यमानꣳसरिरस्यमध्ये॥
घृतंदुहानामदितिंजनायाग्नेमाहिꣳसीःपरमेव्योमन्।गवयमारण्यमनु
तेदिशामितेनचिन्वानस्तन्वोनिषीद।गवयंतेशुगृच्छतुयंद्विष्मस्तंतेशुगृच्छ
तु॥५१॥इममूर्णायुंवरुणस्यनाभिंत्वचंपशूनांद्विपदांचतुष्पदां॥त्वष्टुःप्रजा

नांप्रथमंजनित्रमग्नेमाहिꣳसीःपरमेव्योमन्।उष्ट्रमारण्यमनुतेदिशामितेनचि

न्वानस्तन्वोनिषीद।उष्ट्रंतेशुगृच्छतुयंद्विष्मस्तंतेशुगृच्छतु॥५२॥अजोह्यग्ने
रजनिष्टशोकात्सोऽअपश्यज्जनितारमग्रे।तेनदेवादेवतामग्रमायꣳस्ते
नरोहमायन्नुपमेध्यासः॥शरभमारण्यमनुतेदिशामितेनचिन्वानस्तन्वोनि

सीद॥तारभंतेशुगृच्छतुयंद्विष्मस्तंतेशुगृच्छतु॥५३॥त्वंयविष्ठदाशुषोनॄँःपा
हिशृणुधीगिरः॥रक्षातोकमुतत्मना॥५४॥अपांत्वेमन्सादयाम्यपांत्वोद्मन्सा
दयाम्यपांत्वाभस्मन्सादयामि॥अपांत्वाज्योतिषिसादयाम्यपांत्वायनेसाद
यामि॥अर्णवेत्वासदनेसादयामिसमुद्रेत्वासदनेसादयामिसरिरेत्वासदने
सादयामि॥अपांत्वाक्षयेसादयाम्यपांत्वासर्धिषिसादयामि॥अपांत्वासद
नेसादयाम्यपांत्वासधस्थेसादयाम्यपांत्वायोनौसादयामि॥अपांत्वा
पुरीषेसादयाम्यपांत्वापाथसिसादयामि॥गायत्रेणत्वाछंदसासादयामि
त्रैष्टुभेनत्वाछंदसासादयामिजागतेनत्वाछंदसासादयामि॥आनुष्टुभेन
त्वाछंदसासादयामिपाङ्क्तेनत्वाछंदसासादयामि॥५५॥अयंपुरोभुवस्तस्य

प्राणोभौवायनोवसंतःप्राणायनः।।गायत्रीवासंती।।५६।।गायत्र्यैगायत्रंगा
यत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत्त्रिवृतोरथंतरं।।वसिष्ठःऋषिःप्रजापतिगृहीत
यात्वयाप्राणंगृह्णामिप्रजाभ्यः।।५७।।अयंदक्षिणाविश्वकर्मातस्यमनोवै
श्वकर्मणं।ग्रीष्मोमानसस्त्रिष्टुप्ग्रैष्मी।।५८।।त्रिष्टुभःस्वारꣳस्वारादंतर्या
मोंतर्यामात्पंचदशःपंचदशाद्बृहत्।।भरद्वाजःऋषिःप्रजापतिगृहीतयात्व
यामनोगृह्णामिप्रजाभ्यः।।५९।।अयंपश्चाद्विश्वव्यचास्तस्यचक्षुर्वैश्वव्यच
सं।वर्षाश्चाक्षुष्योजगतीवार्षी।।६०।।जगत्याःऋक्सममृक्समाच्छुक्रःशुक्रा
त्सप्तदशःसप्तदशाद्वैरूपं।।६१।।जमदग्निर्ऋषिःप्रजापतिगृहीतयात्वयाच
क्षुर्गृह्णामिप्रजाभ्यः।।६२।।इदमुत्तरात्स्वस्तस्यश्रोत्रꣳसौवं।।शरच्छ्रौत्र्यनुष्टुप्शा

रदी॥५७॥अनुष्टुभःऐळमैळान्मंथीमंथिनःएकविꣳशःएकविꣳशाद्वैराजं॥
विश्वामित्रऋषिःप्रजापतिगृहीतयात्वयाश्रोत्रंगृह्णामिप्रजाभ्यः॥५८॥इ
यमुपरिमतिस्तस्यैवाङ्मात्या॥हेमंतोवाच्यःपंक्तिर्हैमंती॥५९॥पंक्त्यैनिधव
य न्निधवतःआग्रयणःआग्रयणात्रिणवत्रयस्त्रिꣳशौत्रिणवत्रयस्त्रिꣳ
शाभ्याꣳशाक्वररैवते॥विश्वकर्मऋषिःप्रजापतिगृहीतयात्वयावाचंगृ
ह्णामिप्रजाभ्यः॥लोकंपृणताःअस्येद्रंविश्वाः॥१५॥१३॥इतियजुर्वेदसं
हितायांचतुर्दशोध्यायः॥१३॥हरिःॐरम॥ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासि
ध्रुवंयोनिमासीदसाधुया॥उख्यस्यकेतुंप्रथमंजुषाणाअश्विनाध्वर्यूसाद
यतामिहत्वा॥१॥कुलायिनीघृतवतीपुरंधिःस्योनेसीदसदनेपृथिव्याः॥

२१

अभित्वारुद्रावसवोगृणंत्विमाब्रह्मपिपिहिसौभगायाश्विनाध्वर्यूसादयतामिह
त्वा॥२॥स्वेदक्षेदक्षपितेहसीददेवानांसुम्नेबृहतेरणाय॥पितेवैधिसूनवः
आसुशेवास्वावेशातन्वासंविशस्वाश्विनाध्वर्यूसादयतामिहत्वा॥३॥पृथिव्याः
पुरीषमस्यप्सोनामतांत्वाविश्वेअभिगृणंतुदेवाः॥स्तोमपृष्ठाघृतवतीहसीद
प्रजावदस्मेद्रविणायजस्वाश्विनाध्वर्यूसादयतामिहत्वा॥४॥अदित्यास्त्वापृष्ठे
सादयाम्यंतरिक्षस्यधर्त्रींविष्टंभनींदिशामधिपत्नींभुवनानां॥ऊर्मिर्द्रप्सोःअपा
मसिविश्वकर्मातःऋषिरश्विनाध्वर्यूसादयतामिहत्वा॥शुक्रश्चशुचिश्चग्रै
ष्माःऋतूःअग्नेरंतःश्लेषोसि॥कल्पेतांद्यावापृथिवीकल्पंतामापःओषधयः
कल्पंतामग्नयःपृथङ्ममज्यैष्ठ्यायसव्रताः॥येःअग्नयःसमनसोंतराद्यावा

२६

पृथिवीऽइमे।।ग्रैष्माऽऋतूऽअभिकल्पमानाऽइंद्रमिवदेवाऽअ।भिसंविशंतुत
यादेवतयांगिरस्वध्रुवेसीदतम्।।५।।सजूर्ऋतुभिःसजूर्विधाभिःसजूर्देवैः
सजूर्देवैर्वयोनाधैः।।अग्नयेत्वावैश्वानरायाश्विनाध्वर्यूसादयतामिहत्वा।।
सजूर्ऋतुभिःसजूर्विधाभिःसजूर्वसुभिःसजूर्देवैर्वयोनाधैः।।अग्नयेत्वा
वैश्वानरायाश्विनाध्वर्यूसादयतामिहत्वा।।सजूर्ऋतुभिःसजूर्विधाभिःस
जूरुद्रैःसजूर्देवैर्वयोनाधैः।।अग्नयेत्वावैश्वानरायाश्विनाध्वर्यूसादय
तामिहत्वा।।सजूर्ऋतुभिःसजूर्विधाभिःसजूरादित्यैःसजूर्देवैर्वयोनाधैः।।
अग्नयेत्वावैश्वानरायाश्विनाध्वर्यूसादयतामिहत्वा।।सजूर्ऋतुभिःस
जूर्विधाभिःसजूर्विश्वैर्देवैःसजूर्देवैर्वयोनाधैः।।अग्नयेत्वावैश्वानराया

श्विनाध्वर्यूसादयतामिहत्वा॥६॥प्राणंमेपाह्यपानंमेपाहिव्यानंमेपाहि॥
चक्षुर्म्मउर्व्याविभाहिश्रोत्रंमेश्लोकय॥७॥अपःपिन्वोषधीर्जिन्वद्विपादव
चतुष्पात्पाहि॥दिवोवृष्टिमेरय॥८॥मूर्द्धावयःप्रजापतिश्छंदःक्षत्रंवयो
मयंदंछंदः॥विष्टंभोवयोधिपतिश्छंदोविश्वकर्म्मावयःपरमेष्ठीछंदः॥९
बस्तोवयोविवलंछंदोवृष्णिर्वयोविशालंछंदः॥पुरुषोवयस्तंद्रंछंदोव्या

घ्रोवयोनाधृष्टंछंदः॥१०॥सिंहोवयश्छदिश्छंदःपष्ठवाड्वयोबृहतीछंदः॥
उक्षावयःककुप्छंदःऋषभोवयःसतोबृहतीछंदः॥११॥अनड्वान्वयःपंक्ति
छंदोधेनुर्वयोजगतीछंदः॥त्र्यविर्वयस्त्रिष्टुप्छंदोदित्यवाड्वयोविराड्छं
दः॥१२॥पंचाविर्वयोगायत्रीछंदस्त्रिवत्सोवयउष्णिक्छंदः॥तुर्यवाड्वयो

नुष्टुप्छंदोलोकंपृणताअस्येंद्रंविश्वाः॥१३॥इंद्राग्नीऽअव्यथमानामिष्टकां
दृंहतंयुवं॥पृष्ठेनद्यावापृथिवीअंतरिक्षंचविबाधसे॥१४॥विश्वकर्म्मा
त्वासादयत्वंतरिक्षस्यपृष्ठेव्यचस्वतींप्रथस्वतीं॥ऽअंतरिक्षंयच्छांतरिक्षंदृं
हांतरिक्षंमाहिंसीः॥विश्वस्मैप्राणायापानायव्यानायोदानायप्रतिष्ठायै
चरित्राय॥वायुष्ट्वाभिपातुमह्यास्वस्त्याछर्दिषाशंतमेनतयादेवतयांगिर
स्वद्ध्रुवासीद॥१५॥राज्ञ्यसिप्राचीदिग्विराळसिदक्षिणादिक्सम्राळसिप्र
तीचीदिक्स्वराळस्युदीचीदिगधिपत्न्यसिबृहतीदिक्॥विश्वकर्म्मात्वासा
दयत्वंतरिक्षस्यपृष्ठेज्योतिष्मतीं॥विश्वस्मैप्राणायापानायव्यानायविश्वं
ज्योतिर्यच्छ॥वायुष्टेधिपतिस्तयादेवतयांगिरस्वद्ध्रुवासीद॥१६॥नभश्चन

भस्यश्चवार्षिकाःऋतूःअग्नेरंतःश्लेषोसि॥कल्पेतांद्यावापृथिवीकल्पंतामापः
ओषधयःकल्पंतामग्नयःपृथङ्ममज्यैष्ठ्यायसव्रताः॥येःअग्नयःसमनसो
ंतराद्यावापृथिवीःइमे॥वार्षिकाःऋतूःअग्नेरंतःश्लेषोसि॥अभिकल्पमा
नाःइंद्रमिवदेवाःअभिसंविशंतुतयादेवतयांगिरस्वध्रुवेसीदतं॥इषश्चोर्ज

श्चशारदाःऋतूःअग्नेरंतःश्लेषोसि॥कल्पेतांद्यावापृथिवीकल्पंतामापःओ
षधयःकल्पंतामग्नयःपृथङ्ममज्यैष्ठ्यायसव्रताः॥येःअग्नयःसमनसोंत
राद्यावापृथिवीःइमे॥शारदाःऋतूःअभिकल्पमानाःइंद्रमिवदेवाःअभि
संविशंतुतयादेवतयांगिरस्वध्रुवेसीदतम्॥१६॥आयुर्मेपाहिप्राणंमेपा
ह्यपानंमेपाहिव्यानंमेपाहि॥चक्षुर्मेपाहिश्रोत्रंमेपाहिवाचंमेपिन्वमनोमे

सित्वा॥प्राणंमेपाहिज्योतिर्मेयच्छ॥१८॥माछंदःप्रमाछंदःप्रतिमाछंदोऽस्र
स्रीवयश्छंदः॥पंक्तिश्छंदउष्णिक्छंदः॥१९॥बृहतीछंदोनुष्टुप्छंदोविराट्छं
दोगायत्रीछंदः॥त्रिष्टुप्छंदोजगतीछंदः॥२०॥पृथिवीछंदोंतरिक्षंछंदोद्यौश्छं
दःसमाश्छंदः॥नक्षत्राणिछंदोवाक्छंदः॥२१॥मनश्छंदःकृषिश्छंदोहिरण्यं
छंदोगौश्छंदः॥अजाछंदोश्वश्छंदः॥२२॥अग्निर्देवतावातोदेवतासूर्योदे
वताचंद्रमादेवता॥वसवोदेवतारुद्रादेवता॥आदित्यादेवतामरुतोदेवता
विश्वेदेवादेवताबृहस्पतिर्देवता॥इंद्रोदेवतावरुणोदेवता॥२३॥मूर्द्धासिरा
ड्ध्रुवासिधरुणा॥धर्त्र्यसिधरणी॥आयुषेत्वावर्चसेत्वाकृष्यैत्वाक्षेमायत्वा॥
२४॥यंत्रीराड्यंत्र्यसियमनी॥ध्रुवासिधरित्री॥इषेत्वोर्जेत्वारय्यैत्वापोषाय

त्वा॥लोकंपृणा।ताःऽअस्येद्रंविश्वाः॥२५॥आशुस्त्रिवृद्भांतःपंचदशोव्यो
मासप्तदशोधरुणएकविंशःप्रतूर्त्तिरष्टादशः॥तपोनवदशोभीवर्त्तः
सविंशोवर्चोद्वाविंशःसंभरणस्त्रयोविंशोयोनिश्चतुर्विंशः॥२६
गर्भाःपंचविंशःऽओजस्त्रिणवःक्रतुरेकत्रिंशःप्रतिष्ठात्रयस्त्रिंशोब्र
ध्नस्यविष्टपंचतुस्त्रिंशः॥नाकःषट्त्रिंशोविवर्त्तोष्टाचत्वारिंशोधर्त्रं
चतुष्टोमः॥२७॥अग्नेर्भागोसिदीक्षायाःऽआधिपत्यंब्रह्मस्पृतंत्रिवृत्स्तो
मः॥इंद्रस्यभागोसिविष्णोराधिपत्यंक्षत्रंस्पृतंपंचदशस्तोमः॥२८॥नृ
चक्षसांभागोसिधातुराधिपत्यंजनित्रंस्पृतंसप्तदशस्तोमः॥मित्र
स्यभागोसिवरुणस्याधिपत्यंदिवोवृष्टिर्वातस्पृतऽएकविंशस्तोमः॥२९

वसूनांभागोसिरुद्राणामाधिपत्यंचतुष्पात्स्पृतंचतुर्विंशस्तोमः।।आदित्या
नांभागोसिमरुतामाधिपत्यंगर्भास्पृताःपंचविंशस्तोमः।।२५।।अदित्यैभा
गोसिपूष्णऽआधिपत्यमोजस्पृतंत्रिणवस्तोमः।।देवस्यसवितुर्भागोसि
बृहस्पतेराधिपत्यंसमीचीर्दिशस्पृताश्चतुष्टोमस्तोमः।।२६।।यवानांभागो
स्ययवानामाधिपत्यंप्रजास्पृताश्चतुश्चत्वारिंशस्तोमः।।ऋभूणांभागो
सिविश्वेषांदेवानामाधिपत्यंभूतंस्पृतंत्रयस्त्रिंशस्तोमः।।सहश्च
सहस्यश्चहेमंतिकाऽऋतूऽअग्नेरंतःश्लेषोसि।।कल्पेतांद्यावापृथिवी
कल्पंतामापऽओषधयःकल्पंतामग्नयःपृथङ्ममज्यैष्ठ्यायसव्रताः।।ये
ऽअग्नयःसमनसोंतराद्यावापृथिवीऽइमे।।हैमंतिकाऽऋतूऽअभिकल्प

मानाः॥ इंद्रमिव देवाः अभिसंविशंतु तया देवतयांगिरस्वध्रुवे सीदतम्॥२७॥
एकयास्तुवत प्रजाः अधीयंत प्रजापतिरधिपतिरासीत्। तिसृभिरस्तुवत ब्रह्मा
सृज्यत ब्रह्मणस्पतिरधिपतिरासीत्। पंचभिरस्तुवत भूतान्यसृज्यंत भूता
नांपतिरधिपतिरासीत्। सप्तभिरस्तुवत सप्तऋषयोसृज्यंत धाताधिपतिरा
सीत्॥२८॥ नवभिरस्तुवत पितरोसृज्यंतादितिरधिपत्न्यासीत्। एकादशभिरस्तु
वत ऋतवोसृज्यंतार्त्तवाः अधिपतयः आसन्। त्रयोदशभिरस्तुवत मासाः
असृज्यंत संवत्सरोधिपतिरासीत्। पंचदशभिरस्तुवत क्षत्रमसृज्यतेंद्रोधिप
तिरासीत्॥२९॥ सप्तदशभिरस्तुवत ग्राम्याः पशवोसृज्यंत बृहस्पतिरधि
पतिरासीत्। नवदशभिरस्तुवत शूद्रार्यौः असृज्येतामहोरात्रेः अधिपत्नीः आ

स्ताम्॥ एकविंशत्यास्तुवतैकशफाः पशवोसृज्यंत वरुणोधिपतिरासीत्त्रयो
विंशत्यास्तुवत क्षुद्राः पशवोसृज्यंत पूषाधिपतिरासीत्॥ २५॥ पंचविंशत्या
स्तुवतारण्याः पशवोसृज्यंत वायुरधिपतिरासीत्सप्तविंशंसप्तविंशत्या
स्तुवत द्यावापृथिवी व्यैतां वसवो रुद्रा आदित्या अनुव्यायंस्त एवाधि
पतय आसन्॥ नवविंशत्यास्तुवत वनस्पतयोसृज्यंत सोमोधिपतिरासी
देकत्रिंशतास्तुवत प्रजा असृज्यंत यवाश्चायवाश्चाधिपतय आसन्॥
त्रयस्त्रिंशतास्तुवत भूतान्यशाम्यन्प्रजापतिः परमेष्ठ्यधिपतिरासीत्॥
लोकंपृणता॰ अस्य स्वदु इंद्रं विश्वाः॥ २६॥ इति काण्वसंहितापाठे पंचदशोध्यायः॥
॥६३॥६३॥६७॥ हरिः ॐ॥ अग्ने जातान्प्रणुदा नः सपत्नान्प्रत्यजाताञ्जातवेदो नुद

स्वा॥अधिनोब्रूहिसुमनाअहेळंस्तवंस्यामशर्मंस्त्रिवरूथउद्भौ॥१॥सह
स्राजातान्प्रणुदानःसपत्नान्प्रत्यजातान्नुदजातवेदः॥अधिनोब्रूहिसुमन
स्यमानोवयंस्यामप्रणुदानःसपत्नान्॥षोडशीस्तोमःओजोद्रविणंच
तुश्चत्वारिंशःस्तोमोवर्चोद्रविणं॥२॥अग्नेःपुरीष्यमस्यप्सोनामतांत्वावि
श्वेअभिगृणंतुदेवाः॥स्तोमपृष्ठाघृतवतीहसीदप्रजावदस्मेद्रविणायज
स्वा॥३॥एवश्छंदोवरिवश्छंदःशंभूश्छंदःपरिभूश्छंदः॥आच्छच्छंदोमन
श्छंदोव्यचश्छंदः॥४॥सिंधुश्छंदःसमुद्रश्छंदःसरिरंछंदः॥ककुप्छंदस्त्रि
ककुप्छंदःकाव्यंछंदोअंकुपंछंदः॥५॥अक्षरपंक्तिश्छंदःपदपंक्तिश्छं
दोविष्टारपंक्तिश्छंदःक्षुरोभ्रजश्छंदः॥आच्छच्छंदःप्रच्छच्छंदःसंयच्छंदो

वियच्छंदः॥६॥बृहच्छंदोरथंतरंछंदोनिकायश्छंदोविवधंछंदः॥गिरश्छंदोभ्रज
श्छंदः॥संस्तुप्छंदोनुष्टुप्छंदः॥७॥एवश्छंदोवरिवश्छंदोवयश्छंदोवयस्कृ
छंदः॥विष्पर्द्धाश्छंदोविशालंछंदःछदिश्छंदोदूरोहणंछंदः।तंद्रंछंदोऽअं
कांकंछंदः॥८॥रश्मिनासत्यायसत्यंजिन्वप्रेतिनाधर्मणा।धर्मंजिन्व।अन्वि
त्यादिवादिवंजिन्वसंधिनांतरिक्षेणांतरिक्षंजिन्व॥९॥प्रतिधिनापृथिव्यापृ
थिवींजिन्वविष्टंभेनवृष्ट्यावृष्टिंजिन्व।प्रवयान्हाहर्जिन्वानुयारात्र्यारात्रीं
जिन्व॥१०॥उशिजावसुभ्योवसूंजिन्वप्रकेतेनादित्येभ्यआदित्यांजिन्व।तं
तुनारायस्पोषेणरायस्पोषंजिन्वसंसर्पेणश्रुतायश्रुतंजिन्व॥११॥ऐडेनौ
षधीभिरोषधीर्जिन्वोत्तमेनतनूभिस्तनूर्जिन्व।वयोधसाधीतेनाधीतंजि

न्वाभिजितातेनसातेनोर्जिन्व।प्रतिपदसिप्रतिपदेत्वानुपदस्यनुपदेत्वा॥सं
पदसिसंपदेत्वातेजोसितेजसेत्वा॥१३॥त्रिवृदसित्रिवृतेत्वाप्रवृदसिप्रवृते
त्वा॥विवृदसिविवृतेत्वासवृदसिसवृतेत्वा॥१४॥आक्रमोस्याक्रमाय
त्वासंक्रमोसिसंक्रमायत्वा।उत्क्रमोस्युत्क्रमायत्वोत्क्रांतिरस्युत्क्रांत्यैत्वा॥
५ पति अधिनोर्जोर्जंजिन्ववृषभीःसत्रायसत्रंजिन्व॥१५॥राज्ञ्यसिप्राचिदि
ग्वसवस्तेदेवाःअधिपतयः॥अग्निर्हेतीनांप्रतिधर्त्ता॥१६॥त्रिवृत्वास्तो
मःपृथिव्याꣳश्रयत्वाज्यमुक्थमव्यथायैस्तभ्नातु॥रथंतरꣳसामप्रतिष्ठि
त्याꣳअंतरीक्षे॥१७॥ऋषयस्त्वाप्रथमजादेवेषुदिवोमात्रयावरिम्णाप्रथं
तु॥विधर्त्ताचायमधिपतिश्चतेत्वासर्वेसंविदानानाकस्यपृष्ठेस्वर्गेलोके

यजमानंचसादयंतु॥१८॥विराळसीदक्षिणादिग्रुद्रास्तेदेवाऽअधिपतयः॥इंद्रो
हेतीनांप्रतिधर्त्ता॥१९॥पंचदशस्त्वास्तोमः पृथिव्याꣳश्रयतुप्रउगमुक्थमव्यथायैस्त
भ्नातु॥बृहत्सामप्रतिष्ठित्याऽअंतरिक्षे॥२०॥ऋषयस्त्वाप्रथमजादेवेषुदिवोमात्र
यावरिम्णाप्रथंतु॥विधर्त्ताचायमधिपतिश्चतेत्वासर्वेसंविदानानाकस्यपृष्ठे
स्वर्गेलोकेयजमानंचसादयंतु॥२१॥संम्राळसीप्रतीचीदि~~ग्वसवरा~~ळगादित्यास्ते
देवाऽअधिपतयः॥वरुणोहेतीनांप्रतिधर्त्ता॥२२॥सप्तदशस्त्वास्तोमः पृथिव्याꣳ
श्रयतुमरुत्वतीयमुक्थमव्यथायैस्तभ्नातु॥वैरूपꣳसामप्रतिष्ठित्याऽअंतरि
क्षे॥२३॥ऋषयस्त्वाप्रथमजादेवेषुदिवोमात्रयावरिम्णाप्रथंतु॥विधर्त्ताचाय
मधिपतिश्चतेत्वासर्वेसंविदानानाकस्यपृष्ठेस्वर्गेलोकेयजमानंचसादयंतु॥

॥२४॥स्वराळस्युदीचीदिङ्मरुतस्तेदेवाऽअधिपतयः॥सोमोहेतीनांप्रतिधर्त्ता॥२५
एकविंशस्त्वास्तोमःपृथिव्यांश्रयतुनिष्केवल्यमुक्थमव्यथायैस्तभ्नातु।वै
राजंसामप्रतिष्ठित्याऽअन्तरिक्षे॥२६॥ऋषयस्त्वाप्रथमजादेवेषुदिवोमात्र
यावरिम्णाप्रथन्तु॥विधर्त्ताचायमधिपतिश्चतेत्वासर्वेसंविदानानाकस्यपृष्ठे
स्वर्गेलोकेयजमानंचसादयन्तु॥२७॥अधिपत्न्यसिबृहतीदिग्विश्वेतेदेवाऽअ
धिपतयः॥बृहस्पतिर्हेतीनांप्रतिधर्त्ता॥२८॥त्रिणवत्रयस्त्रिंशौत्वास्तोमौ
पृथिव्यांश्रयतांवैश्वदेवाग्निमारुतेउक्थेऽअव्यथायैस्तभ्नीताम्॥शाक्वर
रैवतेसामनीप्रतिष्ठित्याऽअन्तरिक्षे॥२९॥ऋषयस्त्वाप्रथमजादेवेषुदिवोमात्र
यावरिम्णाप्रथन्तु॥विधर्त्ताचायमधिपतिश्चतेत्वासर्वेसंविदानानाकस्यपृष्ठेस्व

र्गे लोके यजमानं च सादयंतु॥२०॥ अयं पुरो हरिकेशः सूर्यरश्मिस्तस्य रथगृत्सश्च रथौजाश्च सेनानीग्रामण्यौ॥ पुंजिकस्थला च क्रतुस्थला चाप्सरसौ दंक्ष्णवः पशवो हेतिः पौरुषेयो वधः प्रहेतिः॥२१॥ तेभ्यो नमो ऽअस्तु ते नो मृळयंतु ते नोवंतु॥ ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जंभे दध्मः॥२२॥ अयं दक्षिणा विश्वकर्म्मा तस्य रथस्वनश्च रथेचित्रश्च सेनानीग्रामण्यौ॥ मेनका च सहजन्या चाप्सरसौ यातुधाना हेती रक्षांसि प्रहेतिः॥२३॥ तेभ्यो नमो ऽअस्तु ते नो मृळयंतु ते नोवंतु॥ ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जंभे दध्मः॥२४॥ अयं पश्चाद्विश्वव्यचास्तस्य रथप्रोतश्चासमरथश्च सेनानीग्रामण्यौ॥ प्रम्लोचंती चानुम्लोचंती चाप्सरसौ व्याघ्रा हेतिः सर्पाः प्रहेतिः॥२५॥ तेभ्यो नमो ऽअस्तु ते नो मृळयंतु ते नोवंतु॥

तेयंद्विष्मोयश्चनोद्वेष्टितमेषांजंभेदध्मः॥३६॥अयमुत्तरात्संयद्वसुस्तस्यार्क्ष्यश्चा ना
रिष्टनेमिश्चसेनानीग्रामण्यौ॥विश्वाचीचघृताचीचाप्सरसाऽआपोहेतिर्वातः
प्रहेतिः॥३७॥तेभ्योनमोऽअस्तुतेनोमृळयंतुतेनोवंतु॥तेयंद्विष्मोयश्चनोद्वेष्टि
तमेषांजंभेदध्मः॥३८॥अयमुपर्यर्वाग्वसुस्तस्यसेनजिच्चसुषेणश्चसेनानीग्रा
२७ मण्यौ॥उर्वशीचपूर्वचित्तिश्चाप्सरसाऽअवस्फूर्जन्हेतिर्विद्युत्प्रहेतिः॥३९॥ते
भ्योनमोऽअस्तुतेनोमृळयंतुतेनोवंतु॥तेयंद्विष्मोयश्चनोद्वेष्टितमेषांजंभेदध्मः॥
४०॥अग्निर्मूर्द्धादिवःककुत्पतिःपृथिव्याऽअयं॥अपांरेतांसिजिन्वति॥ २७
४१॥अयमग्निःसहस्रिणोवाजस्यशतिनस्पतिः॥मूर्द्धाकवीरयीणाम्॥४२॥
त्वामग्नेपुष्करादध्यथर्वानिरमंथत॥मूर्ध्नोविश्वस्यवाघतः॥४३॥भुवोयज्ञस्यर

स जे॰भ्यनेतायत्रानिथुभिः सचसेमिभुवाभिः॥ द्विविमूर्द्धानंदधिषेस्वर्षां जिऽह्वामग्नेच
कृषेहव्यवाहम्॥४४॥ अबोध्यग्निः समिधाजनानांप्रतिधेनुमीवायतीमुषासम्॥
यह्वाः इवप्रवयामुज्जिहानाः प्रभानवः सिस्रतेनाकमछ॥४५॥ अवोचामकवये
मेध्यायवचोवंदारुवृषभायवृष्णे॥ गविष्ठिरोनमसास्तोममग्नौदिवीवरुक्ममु
रुव्यंचमश्रेत्॥४६॥ अयमिहप्रथमोधायिधातृभिर्होतायजिष्ठोअध्वरेष्वीड्यः॥
यमप्नवानोभृगवोविरुरुचुर्वनेषुचित्रंविभ्वंविशेविशे॥४७॥ जनस्यगोपाअ
जनिष्टजागृविरग्निः सुदक्षः सुवितायनव्यसे॥ घृतप्रतीकोबृहतादिविस्पृ
शाद्युमद्विभातिभरतेभ्यः शुचिः॥४८॥ त्वामग्नेअंगिरसोगुहाहितमन्वविं
दन्छिश्रियाणंवनेवने॥४९॥ सजायसेमथ्यमानः सहोमहत्वामाहुःसहस

स्पुत्रमेंतिरः॥४९॥ संस्रायुःसंवःसम्यंचमिषꣳस्तोमंचाग्नये॥ वर्षिष्ठायक्षि
तीनामूर्ज्जोनप्त्रेसहस्वते॥५०॥ सꣳसमिद्युवसेवृषन्नग्नेविश्वान्यर्य्यऽआ॥ इ
ळस्पदेसमिध्यसेसनोवसून्याभर॥५१॥ त्वामग्नेहविष्मंतोदेवंमर्त्तासऽई
ळते॥ मन्येत्वाजातवेदसꣳसहव्यावक्ष्यानुषक्॥५२॥ त्वांचित्रश्रवस्तमहवंते
विक्षुजंतवः॥ शोचिष्केशंपुरुप्रियाग्नेहव्यायवोळ्हवे॥५३॥ एनावोअग्निं
न्नमसोर्ज्जोनपातमाहुवे॥ प्रियंचेतिष्ठमरतिꣳस्वध्वरंविश्वस्यदूतममृतं॥
५४॥ विश्वस्यदूतममृतंविश्वस्यदूतममृतम्॥ सयोजतेऽअरुषाविश्वभोजसा
सदुद्रवत्स्वाहुतः॥५५॥ सदुद्रवत्स्वाहुतःसदुद्रवत्स्वाहुतः॥ सुब्रह्मायज्ञःसु
शमीवसूनांदेवꣳराधोजनानां॥५६॥ अग्नेवाजस्यगोमतऽईशानःसहसोय

हो॥अस्मेधेहिजातवेदोमहिश्रवः॥५७॥सइधानोवसुष्कविरग्निरीळेन्योगि
रा॥रेवदस्मभ्यंपुर्वणीकदीदिहि॥५८॥क्षपोराजन्नुतत्मनाग्नेवस्तोरुतोषसः॥
सतिग्मजंभरक्षसोदहप्रति॥५९॥भद्रोनोअग्निराहुतोभद्रारातिःसुभग
भद्रोअध्वरः॥भद्राउतप्रशस्तयः॥भद्राउतप्रशस्तयोभद्रंमनःकृणुष्ववृत्र
तूर्ये॥येनासमत्सुसासहः॥६१॥येनासमत्सुसासहोवस्थिरातनुहिभूरि
शर्द्धतां॥वनेमाते॥अभिष्टिभिः॥६२॥अग्निंतंमन्येयोवसुरस्तंयंयंतिधेनवः॥
अस्तमर्वंतःआशवोस्तंनित्यासोवाजिनःइषंस्तोतृभ्यःआभर॥६३॥
सोअग्निर्योवसुर्गृणेसंयमायंतिधेनवः॥समर्वंतोरघुद्रुवःसंसुजाता
सःसूरयःइषंस्तोतृभ्यःआभर॥६४॥उभेसुश्चंद्रसर्पिषोदर्वीश्रीणीषः

आसनी॥ उतोनुऽत्सुपूर्ध्याऽउक्थेषुशावसस्पतऽइषंऽस्तोतृभ्यऽआभर॥६५॥अ
ग्नेतमद्याश्वन्नस्तोमैःक्रतुन्नभद्रंऽहृदिस्पृशं॥ऋध्यामातऽओहैः॥६६॥अधाह्य
ग्नेक्रतोर्भद्रस्यदक्षस्यसाधोः॥रथीर्ऋतस्यबृहतोबभूथ॥६७॥एभिर्नोऽअ
र्कैर्भवानोऽअर्वाङ्स्वर्णज्योतिः॥अग्नेविश्वेभिःसुमनाऽअनीकैः॥६८॥अग्निंऽ
होतारंमन्येदास्वंतंवसुंऽसूनुंऽसहसोजातवेदसंविप्रन्नजातवेदसम्॥यऊ
र्ध्वयास्वध्वरोदेवोदेवाच्याकृपा॥घृतस्यविभ्राष्टिमनुवष्टिशोचिषाजुह्वानस्य
सर्पिषः॥६९॥अग्नेत्वन्नोऽअंतमऽउतत्राताशिवोभवावरूथ्यः॥वसुरग्निर्वसु
श्रवाऽअच्छानक्षिद्युमत्तमंऽरयिंदाः॥तंत्वाशोचिष्ठदीदिवःसुम्नायनूनमीम
हेसखिभ्यः॥७०॥येनऽऋषयस्तपसासत्रमायन्निंधानाऽअग्निंऽस्वराभरंतः॥

तस्मिन्नहंन्निदधेनाकेऽअग्निंयमाहुर्मनवस्तीर्णबर्हिषं॥७१॥तंपत्नीभिरनुगच्छे
मदेवाःपुत्रैर्भ्रातृभिरुतवाहिरण्यैः॥नाकंगृभ्णानाःसुकृतस्यलोकेतृतीयेपृष्ठे
अधिरोचनेदिवः॥७२॥आवाचोमध्यमरुहद्भुरण्युरयमग्निःसत्पतिश्चेकितानः॥
पृष्ठेपृथिव्यानिहितोदविद्युतदधस्पदंकृणुतांयेपृतन्यवः॥७३॥अयमग्निर्वीर
तमोवयोधाःसहस्रियोद्योततामप्रयुच्छन्।विभ्राजमानःसरिरस्यमध्यऽउप
प्रयाहिदिव्यानिधाम॥७४॥संप्रच्यवध्वमुपसंप्रयाताग्नेपथोदेवयानान्कृणु
ध्वम्।पुनःकृण्वानापितरायुवानान्वाताᳪंसीत्त्वयितंतुमेतं॥७५॥उद्बुध्यस्वा
ग्नेप्रतिजागृहित्वमिष्टापूर्तेसᳪंसृजेथामयंच।अस्मिन्त्सधस्थेऽअध्युत्त
रस्मिन्विश्वेदेवायजमानश्चसीदत॥७६॥येनवहसिसहस्रंयेनाग्नेसर्व

वेदसम्।।तेनेमंयज्ञंनोनयस्वर्देवेषुगंतवे।।७७।।अयंतेयोनिर्ऋत्वियोयतोजा
तोऽअरोचथाः।।तंजानन्नग्नऽआरोहाथानोवर्द्धयारयिम्।।७८।।तपश्चतप
स्यश्चशैशिरावृतूऽअग्नेरंतःश्लेषोसि।कल्पेतांद्यावापृथिवीकल्पंतामा
पऽओषधयःकल्पंतामग्नयःपृथङ्ममज्यैष्ठ्यायसव्रताः।।येऽअग्नयःसमन
सोंतराद्यावापृथिवीऽइमे।शैशिरावृतूऽअभिकल्पमानाऽइंद्रमिवदेवाऽ
अभिसंविशंतुतयादेवतयांगिरस्वद्ध्रुवेसीदतम्।।परमेष्ठीत्वासादयतुदि
वस्पृष्ठेज्योतिष्मतीम्।विश्वस्मैप्राणायापानायव्यानायविश्वंज्योतिर्यच्छ।।
सूर्यस्तेधिपतिस्तयादेवतयांगिरस्वद्ध्रुवासीद।।७९।।लोकंपृणच्छिद्रंपृ
णाथोसीदध्रुवात्वं।।इंद्राग्नीत्वाबृहस्पतिरस्मिन्योनाऽअसीषदन्।।८०।।

युक्तंपावकवर्णꣳशिवंकृधि ।।७।। अपामिदंन्ययनꣳसमुद्रस्यनिवेशनं ।। अन्याꣳ
स्तेऽअस्मत्तपंतुहेतयःपावकोऽअस्मभ्यꣳशिवोभव ।।८।। अग्नेपावकरोचिषामंद्र
यादेवजिह्वया ।। आदेवान्वक्षियक्षिच ।।९।। सनःपावकदीदिवोग्नेदेवाँइहावह ।। उ
पयज्ञꣳहविश्चनः ।।१०।। पावकयायश्चितयंत्याकृपाक्षामंन्रुरुचऽउषसोनभा
नुना ।। तूर्वन्नयामंन्नैतशस्यनूरणऽआयोघृणेनंततृषाणोऽअजरः ।।
११ ।। नमस्तेहरसेशोचिषेनमस्तेऽअस्त्वर्चिषे ।। अन्याꣳस्तेऽअस्मत्तपंतुहेत
यःपावकोऽअस्मभ्यꣳशिवोभवः ।। नृषदेवेडप्सुषदेवेड्बर्हिषदेवेड्वनसदे
वेड्स्वर्विदेवेट् ।।१२।। येदेवादेवानांयज्ञियायज्ञियानाꣳसंवत्सरीणमुपभागमा
गमासते ।। अहुतादोहविषोयज्ञेऽअस्मिन्त्स्वयंपिबंतुमधुनोघृतस्य ।।१३।।

येदेवादेवेष्वधिदेवत्वमायन्येब्रह्मणःपुरएतारोअस्य।येभ्योनऋतेपवतेधा
मकिंचननतेदिवोनपृथिव्याअधिस्नुषु॥१४॥प्राणदाअपानदाव्यानदावर्चो
दावरिवोदाः॥अन्याँस्तेअस्मत्तपन्तुहेतयःपावकोअस्मभ्यंशिवोभव॥
१५॥अग्निस्तिग्मेनशोचिषायासद्विश्वंन्यत्रिणं॥अग्निर्नोवनुतेरयिं॥१६॥
४८ यइमाविश्वाभुवनानिजुह्वदृषिर्होतान्यसीदत्पितानः॥सआशिषाद्रविण
मिच्छमानःप्रथमच्छदवराँआविवेश॥१७॥किंस्विदासीदधिष्ठानमारम्भणं ४६
कतमत्स्वित्कथासीत्॥यतोभूमिंजनयन्विश्वकर्माविद्यामौर्णोन्महिनावि
श्वचक्षाः॥१८॥विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात्॥
संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएकः॥१९॥किंस्विद्वनंक

उसवृक्षःआसयतोद्यावापृथिवीनिष्टतक्षुः॥मनीषिणोमनसापृच्छतेदुत
यदध्यतिष्ठद्भुवनानिधारयन्॥२०॥यातेधामानिपरमाणियावमायामध्य
माविश्वकर्म्मन्नुतेमा॥शिक्षासखिभ्योहविषिस्वधावःस्वयंयजस्वतन्वंवृधा
नः॥२१॥वाचस्पतिंविश्वकर्म्माणमूतयेमनोजुवंवाजेअद्याहुवेम॥सनो
विश्वानिहवनानिजोषद्विश्वशंभूरवसेसाधुकर्म्मा॥२२॥विश्वकर्म्मन्हविषा
वावृधानःस्वयंयजस्वपृथिवीमुतद्यां॥मुह्यंत्वन्येअभितःसपत्नाइहा
स्माकंमघवासूरिरस्तु॥२३॥विश्वकर्म्मन्हविषावर्द्धनेनत्रातारमिंद्रमकृ
णोरवध्यम्॥तस्मैविशःसमनमंतपूर्वीरयमुग्रोविहव्योयथासत्॥२४॥च
क्षुषःपितामनसाहिधीरोघृतमेनेअजनन्नम्नमाने॥यदेदंताअददृहंत

पूर्वआदिद्यावापृथिवीअप्रथेतां ॥२५॥ विश्वकर्माविमनाआद्विहायाधाता
विधातापरमोतसंदृक् तेषामिष्टानिसमिषामदंतियत्रासप्तऋषीन्परए
कमाहुः ॥२६॥ योनःपिताजनितायोविधाताधामानिवेदभुवनानिविश्वा ।
योदेवानांनामधाएकएवतंसंप्रश्नंभुवनायंत्यन्या ॥२७॥ तआयजंत
५१ द्रविणंसमस्माऋषयःपूर्वेजरितारोनभूना । असूर्तेसूर्तेरजसिनिष ५१
त्तेयेभूतानिसमकृण्वन्निमानि ॥२८॥ परोदिवापरएनापृथिव्यापरोदेवे
भिरसुरैर्यदस्ति । कंस्विद्गर्भंप्रथमंदध्रआपोयत्रदेवाःसमपश्यंतवि
श्वे ॥२९॥ तमिद्गर्भंप्रथमंदध्रआपोयत्रदेवाःसमगच्छंतविश्वे । अजस्यना
भावध्येकमर्पितंयस्मिन्विश्वानिभुवनानितस्थुः ॥३०॥ नतंविदाथयइ

श्रीः श्रीमग्नाः सूतपयाः॥ परिगृह्य देवा यज्ञमायंदेवा देवेभ्योऽअध्वर्यंतो अस्थुः॥
५५॥ वीतं हविः शमितं शमिता यजध्यै तुरीयो यज्ञो यत्र हव्यमेति॥ ततो वा
काऽआशिषो नो जुषंतां॥५६॥ सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुद
याँऽअजस्रं॥ तस्य पूषा प्रसवे याति विद्वान्संपश्यन्विश्वा भुवनानि गोपाः॥५७॥
विमान एष दिवो मध्यऽआस्तऽआपप्रिवान्रोदसीऽअंतरिक्षं॥ स विश्वाचीर
भि चष्टे घृताचीरंतरा पूर्वमपरं च केतुं॥५८॥ उक्षा समुद्रोऽअरुणः सुपर्णः पू
र्वस्य योनिं पितुरा विवेश॥ मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजस
स्पात्यंतौ॥५९॥ इंद्रं विश्वाऽअवीवृधन्त्समुद्रव्यचसं गिरः॥ रथीतमं रथी
नां वाजानां सत्पतिं पतिं॥६०॥ देवहूर्यज्ञऽआ च वक्षत्सुम्नहूर्यज्ञऽआ च वक्षत्॥

यस्यदग्निर्द्देवोदेवैः॥ आस्ववसान्॥६१॥ वाजस्यमाप्रसवउग्राभेणोदग्रभीत्॥
अधासपत्नानिन्द्रोमेनिग्राभेणाधराꣳअकः॥६२॥ उद्ग्राभंचनिग्राभंचब्रह्मदेवाः
अवीवृधन्॥ अधासपत्नानिन्द्राग्नीमेविषूचीनान्व्यस्यतां॥६३॥ क्रमध्वमग्नि
नानाकमुख्यꣳहस्तेषुबिभ्रतः॥ दिवस्पृष्ठꣳस्वर्गत्वामिश्रादेवेभिराध्वम्॥६४
प्राचीमनुप्रदिशंप्रेहिविद्वानग्नेरग्नेपुरोअग्निर्भवेह॥ विश्वाआशादीद्या
नोविभाह्यूर्ज्जन्नोधेहिद्विपदेचतुष्पदे॥६५॥ पृथिव्याअहमुदन्तरिक्षमा
रुहमन्तरिक्षाद्दिवमारुहं॥ दिवोनाकस्यपृष्ठात्स्वर्ज्योतिरगामहं॥६६॥ स्व
र्यन्तोनापेक्षन्तआद्याꣳरोहन्तिरोदसी॥ यज्ञंयेविश्वतोधारꣳसुविद्वाꣳसो
वितेनिरे॥६७॥ अग्नेप्रेहिप्रथमोदेवयतांचक्षुर्द्देवानामुतमर्त्यानां॥ इयक्ष

माताभ्युभिःसन्नोषाःस्वर्धेनुयजमानाःस्वस्ति॥६८॥नक्तोषासासमनसाविरूपे
धापयेतेशिशुमेकंसमीची॥द्यावाक्षामारुक्मोअंतर्विभातिदेवाअग्निंधारयं
द्रविणोदाः॥६९॥अग्नेसहस्राक्षशतमूर्द्धञ्छतंतेप्राणाःसहस्रंव्यानाः॥त्वं
साहस्रस्यरायईशिषेतस्मैतेविधेमवाजायस्वाहा॥७०॥सुपर्णोसिगरुत्मा
न्पृष्ठेपृथिव्याःसीद॥भासांतरिक्षमापृणज्योतिषादिवमुत्तभानतेजसादिश
उद्दृंह॥७१॥आजुह्वानःसुप्रतीकःपुरस्तादग्नेःस्वंयोनिमासीदसाधुया॥अ
स्मिन्सधस्थेअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत॥७२॥तांसवि
तुर्वरेण्यस्यचित्रामाहंवृणेसुमतिंविश्वजन्यां॥यामस्यकण्वोअदुहत्प्रपी
नांसहस्रधारांपयसामहींगां॥७३॥विधेमतेपरमेजन्मन्नग्नेविधेमस्तोमै

रवरेसधस्थे॥यस्माद्योनेरुदारिथायजेतंप्रत्वेहवीꣳषिजुहुरेसमिद्धे॥७४॥प्रेद्धो
अग्नेदीदिहिपुरोनोजस्रयासूर्म्यायविष्ठ॥त्वाꣳशश्वंतउपयंतिवाजाः॥७५
अग्नेतमद्याश्वन्नस्तोमैःक्रतुन्नभद्रꣳहृदिस्पृशं॥ऋध्यामातओꣳहैः॥७६॥
चित्तिंजुहोमिमनसाघृतेनयथादेवाइहागमन्वीतिहोत्राऋतावृधः॥प
त्येविश्वस्यभूमनोजुहोमिविश्वकर्म्मणेविश्वाहादाभ्यꣳहविः॥७७॥सप्तते
अग्नेसमिधःसप्तजिह्वाःसप्तऋषयःसप्तधामप्रियाणि॥सप्तहोत्राःसप्त
धात्वायजंतिसप्तयोनीरापृणस्वघृतेनस्वाहा॥७८॥शुक्रज्योतिश्चचित्र
ज्योतिश्चसत्यज्योतिश्चज्योतिष्माꣳश्च॥शुक्रश्चऋतपाश्चात्यꣳहाः॥७९
ईदृङ्चान्यादृङ्चसदृङ्चप्रतिसदृङ्च॥मितश्चसंमितश्चसभराः॥८०॥ऋतजिच्च

सत्यजिच्च सेनजिच्च सुषेणश्च ॥ अंतिमित्रश्च दूरेऽअमित्रश्च गणाः ॥ ८१ ॥ ऋतश
श्च सत्यश्च ध्रुवश्च धरुणश्च ॥ धर्त्ता च विधर्त्ता च विधारयः ॥ ८२ ॥ ईदृक्षास ए
तादृक्षास ऊ षु णः सदृक्षासः प्रतिसदृक्षास एतन ॥ मितासश्च संमितासो नो अ
द्य सभरसो मरुतो यज्ञे अस्मिन् ॥ ८३ ॥ स्वतवाꣳश्च प्रघासी च सांतपन
श्च गृहमेधी च ॥ क्रीडी च शाकी चोज्जेषी ॥ ८४ ॥ इंद्रं दैवीर्विशो मरुतोनुव
र्त्मानोऽभवन्यथेंद्रं दैवीर्विशो मरुतोनुवर्त्मानोऽभवन् ॥ एवमिमं यजमानं दै
वीश्च विशो मानुषीश्चानुवर्त्मानो भवंतु ॥ ८५ ॥ इति काण्वशाखेऽष्टादशो
ऽध्यायः ॥ १८ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ हरिः ॐ ॥ इमम् ॥ इमꣳ स्तनमूर्जस्वंतं धया
पां प्रपीनमग्ने सरिरस्य मध्ये ॥ उत्सं जुषस्व मधुमंतमर्वन्समुद्रियꣳ सदनमा

विन्द्रास्वा॥१॥घृतंमिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतम्वस्यधाम॥अनुष्व
धमावहमादयस्वस्वाहाकृतंवृषभवक्षिहव्यं॥२॥समुद्रादूर्मिर्मधुमांउदा
रदुपाꣳशुनासममृतत्वमानट्॥घृतस्यनामगुह्यंयदस्तिजिव्हादेवानाम य्य
मृतस्यनाभिः॥३॥वयंनामप्रब्रवामाघृतस्यास्मिन्यज्ञेधारयामानमोभिः॥
उपब्रह्माशृणवच्छस्यमानंचतुःशृंगोवमीद्गौरएतत्॥४॥चत्वारिशृंगा
त्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य॥त्रिधाबद्धोवृषभोरोरवी
तिमहोदेवोमर्त्यांआविवेश॥५॥त्रिधाहितंपणिभिर्गुह्यमानंगविदे
वासोघृतमन्वविंदन्॥इंद्रएकꣳसूर्यएकंजजानवेनादेकꣳस्वधयानि
ष्टतक्षुः॥६॥एताअर्षंति हृद्यात्समुद्राच्छतव्रजारिपुणानावचक्षे॥घृ

तीरिक्षेपयोधाः॥पयस्वतीःप्रदिशःसंतुमह्यं॥देवस्यत्वासवितुःप्रसवेश्विनो
बाहुभ्यांपूष्णोहस्ताभ्यां॥सरस्वत्यैवाचोयंतुर्यंत्रेणाग्नेःसांम्राज्येनाभिषिंचा
मि॥७॥ऋताषाळृतधामाग्निर्गंधर्वः॥तस्यौषधयोप्सरसोमुदोनाम॥
सनःइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्ताभ्यःस्वाहा॥८॥संहितोविश्वसामा
सूर्योगंधर्वः॥तस्यमरीचयोप्सरसआयुवोनाम॥सनःइदंब्रह्मक्षत्रंपातुत
स्मैस्वाहावाट्ताभ्यःस्वाहा॥९॥सुषुम्णःसूर्यरश्मिश्चंद्रमागंधर्वः॥तस्यनक्ष
त्राण्यप्सरसोभेकुरयोनाम॥सनःइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्ताभ्यःस्वा
हा॥१०॥इषिरोविश्वव्यचावातोगंधर्वः॥तस्यापोअप्सरसऊर्जोनाम॥स
नइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्ताभ्यःस्वाहा॥११॥भुज्युःसुपर्णोयज्ञोगं

धर्वः ॥ तस्य दक्षिणा ऽ अप्सरस स्तावा नाम ॥ स न ऽ इदं ब्रह्म क्षत्रं पातु तस्मै स्वा
हा वाट् ताभ्यः स्वाहा ॥ ४२ ॥ प्रजापति र्विश्वकर्म्मा मनो गंधर्वः ॥ तस्य ऽ ऋक्सामा
न्यप्सरस ऽ एष्टयो नाम ॥ स न ऽ इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वा
हा ॥ ४३ ॥ स नो भुवनस्य पते प्रजापते यस्य त ऽ उपरि गृहा यस्य वेह ॥ अस्मै
ब्रह्मणे ऽस्मै क्षत्राय महि शर्म्म यच्छ स्वाहा ॥ ४४ ॥ समुद्रोसि नभस्वाना र्द्र
दानुः शंभू र्म्मयोभू रभि मा वाहि स्वाहा ॥ मारुतोसि मरुतां गणः शंभू
र्म्मयोभू रभि मा वाहि स्वाहा ॥ अवस्यू रसि दुवस्वां छंभू र्म्मयोभू रभि मा
वाहि स्वाहा ॥ ४५ ॥ यास्ते ऽ अग्ने सूर्य्ये रुचो दिव मातन्वंति रश्मिभिः ॥
ताभि र्नो ऽ अद्य सर्वाभी रुचे जनाय नस्कृधि ॥ ४६ ॥ या वो देवाः सूर्य्ये रु

[illegible] चोगोष्वश्वेषुयारुचः।।इंद्राग्नीताभिःसर्वाभीरुचंनो
धत्तबृहस्पते।।४७।।रुचंनोधेहिब्राह्मणेषुरुचꣳराजसुनस्कृधि।।रुचंविश्येषुशू
द्रेषुमयिधेहिरुचारुचं।।४८।।तत्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानो
हविर्भिः।।अहेळमानोवरुणेहबोध्युरुशꣳसमानआयुःप्रमोषीः।।४९।।स्व
र्णघर्मस्वाहास्वर्णार्कःस्वाहास्वर्णशुक्रःस्वाहा।।स्वर्णज्योतिःस्वाहास्वर्णसूर्यः
स्वाहा।।५०।।अग्निंयुनज्मिशवसाघृतेनदिव्यꣳसुपर्णंवयसाबृहंतं।।तेनगमे
मब्रध्नस्यविष्टपꣳस्वोरुहाणाःअधिनाकमुत्तमम्।।५१।।इमौतेपक्षाअज
रौपतत्रिणौयाभ्याꣳरक्षाꣳस्यपहꣳस्यग्ने।।ताभ्यांपतेमसुकृतामुलोकंय
त्रऋषयोजग्मुःप्रथमजाःपुराणाः।।५२।।इंदुर्दक्षःश्येनऋतावाहिरण्य

पक्षः शकुनोभुरंण्युः॥ महान्त्सधस्थे ध्रुवःआनिषत्तानमस्तेऽअस्तुमामाहिंसीः॥
२३॥ दिवोमूर्द्धासिपृथिव्यानाभिरूर्गपामोषधीनां॥ विश्वायुःशर्मसप्रथानमस्प
थे॥२४॥ विश्वस्यमूर्द्धन्नधितिष्ठसिश्रितः समुद्रेतेहृदयमप्स्वायुरपोदत्तोदधिं द
भिंत॥ दिवस्पर्जन्यादंतरिक्षात्पृथिव्यास्ततोनोवृष्ट्याव॥२५॥ इष्टोयज्ञोभृगुभि
राशीर्दावसुभिः॥ तस्यनऽइष्टस्यप्रीतस्यद्रविणेहागमेः॥२६॥ इष्टोऽअग्निराहु
तः पिपर्तुनऽइष्टꣳहविः॥ स्वगेदंदेवेभ्योनमः॥२७॥ यदाकूतात्समसुस्रोद्धृ
दोवामनसोवासंभृतंचक्षुषोवा॥ तस्नुप्रेतसुकृतामुलोकंयत्रऽऋषयोजग्मुः
प्रथमजाः पुराणाः॥२८॥ एतꣳसधस्थपरिते ददामियमावहाच्छेवधिंजातवे
दाः॥ अन्वागंतायज्ञपतिर्वोऽअत्रतꣳस्मजानीतपरमेव्योमन्॥२९॥ एतंजाना

थपरमेव्योमन्देवाः सधस्थाविदरूपमस्य।यदागछात्पथिभिर्द्देवयानैरिष्टापूर्त्तेकृ
णावथाविरस्मै॥२०॥उद्बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्त्तेसꣳसृजेथामयंच॥अ
स्मिन्सधस्थेअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत॥२१॥येनवहसिसह
स्रंयेनाग्नेसर्ववेदसं।तेनेमंयज्ञंनोनयस्वर्द्देवेषुगंतवे॥२२॥प्रस्तरेणपरिधि
नास्रुचावेद्याचबर्हिषा॥ऋचेमंयज्ञंनोनयस्वर्द्देवेषुगंतवे॥२३॥यद्दत्तंयत्परा
दानंयत्पूर्त्तंयाश्चदक्षिणाः॥तदग्निर्वैश्वकर्मणःस्वर्द्देवेषुनोदधत्॥२४॥यत्र
धाराअनपेतामधोर्घृतस्यचयाः॥तदग्निर्वैश्वकर्मणःस्वर्द्देवेषुनोदधत्॥२५॥
येअग्नयःपांचजन्याअस्यांपृथिव्यामधि।तेषामसित्वमुत्तमःप्रनोजीवा
तवेसुव॥२६॥वार्त्रहत्यायशवसेपृतनाषाह्यायच॥इंद्रत्वावर्त्तयामसि॥२७

सहस्रानुंपुरुहूतक्षियंतंमहस्तामिंद्रसंपिताकुणारुं॥अभिवृत्रंवर्द्धमानंपियारु
मपादमिंद्रतवसाजघंथ॥३८॥विनइंद्रमृधोजहिनीचायच्छपृतन्यतः॥यो
अस्माँअभिदासत्यधरंगमयातमः॥३९॥मृगोनभीमःकुचरोगिरिष्ठाःपरा
वतआजगंथापरस्याः॥सृकंसंशायपविमिंद्रतिग्मंविशत्रूंताढिवि
मृधोनुदस्व॥४०॥वैश्वानरोनऊतयआप्रयातुपरावतः॥अग्निर्नःसुष्टुती

रुप॥४१॥पृष्टोदिविपृष्टोअग्निःपृथिव्यांपृष्टोविश्वाओषधीराविवेश॥वैश्वा

नरःसहसापृष्टोअग्निःसनोदिवासरिषस्पातुनक्तं॥४२॥अश्यामतंकाममग्ने
तवोती॥अश्यामरयिंरयिवःसुवीरं॥अश्यामवाजमभिवाजयंतोश्यामद्यु
म्नमजराजरंते॥४३॥वयंतेअद्यररिमाहिकाममुत्तानहस्तानमसोपसद्य॥

यजिष्ठेनमनसायक्षिदेवानस्रेधतामन्मनाविप्रोऽअग्ने॥४४॥धामछदग्नि
रिंद्रोब्रह्मादेवोबृहस्पतिः॥सचेतसोविश्वेदेवायज्ञंप्रावंतुनःशुभे॥४५॥त्वं
यविष्ठदाशुषोनॄंःपाहिशृणुधीगिरः॥रक्षातोकमुतत्मना॥४६॥छ॥
इतियजुर्वेदसंहितायांयाज्ञवल्क्यांविंशतितमोध्यायः॥२०॥छ॥छ॥छ॥
॥छ॥छ॥छ॥ छ ॥छ॥शुभंभवतु॥छ॥ छ ॥छ॥ छ ॥छ॥श्रीरस्तु॥

१

श्रीगणेशायनमः॥ हरिः ॐ॥ समिद्धोअंजनकृदरंमतीनांघृत
मग्नेमधुमत्पिन्वमानः॥ वाजीवहन्वाजिनंजातवेदोदेवानांवक्षिप्रि
यमासधस्थं॥१॥ घृतेनांजन्संपथोदेवयानान्प्रजानन्वाज्यप्येतुदेवा
न्॥ अनुत्वासप्तेप्रदिशःसचंतांस्वधामस्मैयजमानायधेहि॥ई
ड्यश्चासिवंद्यश्चवाजिन्नाशुश्चासिमेध्यश्चसप्ते॥ अग्निष्ट्वादेवैर्व
सुभिःसजोषाःप्रीतंवह्निंवहतुजातवेदाः॥ स्तीर्णंबर्हिःसुष्टरीमाजुषा
णोरुपृथुप्रथमानंपृथिव्यां॥ देवेभिर्युक्तमदितिःसजोषाःस्योनंकृ
ण्वानासुवितेदधातु॥४॥ एताउवःसुभगाविश्वरूपाविपक्षोभिःश्रय
माणाउदातैः॥ ऋष्वाःसतीःकवषःशुभमानाद्वारोदेवीःसुप्रायणाभ

१

वंतु॥५॥ अंनरामित्रावरुणात्वरंतीमुखंयज्ञानामभिसंविदाने। उषा
सांवांसुहिरण्येसुशिल्पेऋतस्ययोनाविहसादयामि॥६॥ प्रथमाव
ंसरथिनासुवर्णादेवौपश्यंतौभुवनानिविश्वा॥ अपिप्रयंचोदना
वांमिमानाहोताराज्योतिःप्रदिशादिशंता॥७॥ आदित्यैर्नोभारती
वष्टुयज्ञंसरस्वतीसहरुद्रैर्नआवीत्॥ इडोपहूतावसुभिःसजो
षायज्ञंनोदेवीरमृतेषुधत्त॥८॥ त्वष्टावीरंदेवकामंजजानत्वष्टुर
र्वाजायतआशुरश्वः॥ त्वष्टेदंविश्वंभुवनंजजानबहोःकर्त्तारमिहय
क्षिहोतः॥९॥ अश्वोघृतेनत्मन्यासमक्तउपदेवाँऋतुशःपाथएतु
वनस्पतिर्देवलोकंप्रजानन्नग्निनाहव्यास्वदितानिवक्षत्॥१०॥ प्र

जापतिस्तपसावावृधानस्सद्योजातोदधिषेयज्ञमग्ने॥स्वाहाकृतेन
हविषापुरोगायाहिसाध्याहविरदंतुदेवाः॥११॥केतुंकृण्वन्नकेतवेपे
शोमर्याअपेशसे॥समुषद्भिरजायथाः॥१२॥जीमूतस्येवभवति
प्रतीकंयद्वर्मीयातिसमदामुपस्थे॥अनाविद्धयातन्वाजयत्वंस
त्वावर्मणोमहिमापिपर्तु॥१३॥धन्वनागाधन्वनाजिंजयमधन्वना
तीव्राःसमदोजयेम॥धनुःशत्रोरपकामंकृणोतिधन्वनासर्वाःप्र
दिशोजयेम॥१४॥तेआचरंतीसमनेवयोषामातेवपुत्रंबिभृतामुप
स्थे॥अपशत्रून्विध्यतांसंविदानेआर्त्नीइमेविष्फुरंतीअमित्रान्
१५॥वक्ष्यंतीवेदागनीगंतिकर्णंप्रियंसखायंपरिषस्वजाना॥

२

२

योषेवसिंक्तेवितताधिधन्वंज्याइयꣳसमनेपारयंती॥१६॥अ
हिरिवभोगैःपर्येतिबाहुंज्यायाहेतिंपरिबाधमानः॥हस्तघ्नोविश्वा
वयुनानिविद्वान्पुमान्पुमांꣳसंपरिपातुविश्वतः॥१७॥बह्वीनां
पिताबहुरस्यपुत्रश्चिश्चाकृणोतिसमनावगत्य॥इषुधिःसं
काःपृतनाश्चसर्वाःपृष्ठेनिनद्धोजयतिप्रसूतः॥१८॥सुपर्णंव
स्तेमृगोअस्यादंतोगोभिःसन्नद्धापततिप्रसूता॥यत्रानरःसंच
विचद्रवंतितत्रास्मभ्यमिषवःशर्मयंꣳसन्॥१९॥वनस्पतेवीड्वंगो
हिभूयाअस्मत्सखाप्रतरणःसुवीरः॥गोभिःसन्नद्धोअसिवीळ
यस्वास्थातातेजयतुजेत्वानि॥२०॥रथेतिष्ठन्नयतिवाजिनःपुरो

यत्रंयत्रकामयंतिसुषारथिः॥अभीशूनांमहिमानंपनायतमनःपश्चा
दनुयच्छंतिरश्मयः॥२१॥आजंघंतिसान्वेषांजघनांउपजिघ्नते॥अश्वा
जनिप्रचेतसोश्वान्समत्सुचोदय॥२२॥उपश्वासयपृथिवीमुतद्यां
पुरुत्रातेमनुतांविष्ठितंजगत्॥सदुंदुभेसजूरिंद्रेणदेवैर्दूराद्दवीयोः
अपसेधशत्रून्॥२३॥यदक्रंदःप्रथमंजायमानउद्यन्समुद्रादुत
वापुरीषात्॥श्येनस्यपक्षाहरिणस्यबाहूउपस्तुत्यंमहिजातंते
अर्वन्॥२४॥यमेनदत्तंत्रितएनमायुनगिंद्रएणंप्रथमोअध्यति
ष्ठत्॥गंधर्वोअस्यरशनामगृभ्णात्सुरादश्वंवसवोनिरतष्ट॥२५
असियमोअस्यादित्योअर्वन्नसित्रितोगुह्येनव्रतेन॥असिसो

॥श्रीगणेशायनमः॥ हरिः ॐ॥ स्वाद्वींत्वास्वादुनातीव्रांतीव्रेणामृताममृतेन।
मधुमतींमधुमतासृजामिसꣳसोमेन। सोमोस्यश्विभ्यांपच्यस्वसरस्वत्यैपच्य
स्वेंद्रायसुत्राम्णेपच्यस्व॥१॥परीतोषिंचतासुतꣳसोमोयउत्तमꣳहविः॥दधं
न्वांयोनर्योऽअप्स्वंतरासुषावसोममद्रिभिः॥२॥वायोःपूतःपवित्रेणप्रांक्सोमोऽ
अतिद्रुतः॥इंद्रस्ययुज्यःसखा॥३॥वायोःपूतःपवित्रेणप्रत्यंक्सोमोऽअतिद्रुतः॥
१ इंद्रस्ययुज्यःसखा॥४॥पुनातितेपरिस्रुतꣳसोमꣳसूर्यस्यदुहिता। वारेण
शश्वतातना॥५॥ब्रह्मक्षत्रंपवतेतेजइंद्रियꣳसुरयासोमःसुतऽआसुतोम १
दाय। शुक्रेणदेवदेवताःपिपृग्धिरसेनान्नंयजमानायधेहि॥६॥कुविदंग
यवमंतोयवंचिद्यथादांत्यनुपूर्वंवियूय। इहेहैषांकृणुहिभोजनानियेब

हिषोनमधुश्चिन्तेनगमुः॥ उपयामगृहीतोस्यश्विभ्यांत्वासरस्वत्यैत्वेंद्रायत्वासुत्रा
म्णे॥ एषतेयोनिस्तेजसेत्वावीर्य्यायत्वाबलायत्वा॥५॥ नानाहिवान्देवहितꣳस
दस्कृतंमासꣳसृक्षाथांपरमेव्योमन्॥ सुरात्वमसिशुष्मिणीसोमएषमामा
हिꣳसीःस्वांयोनिमाविशंती॥६॥ उपयामगृहीतोस्याश्विनंतेजःसारस्वतं
वीर्य्यमैंद्रंबलम्॥ एषतेयोनिर्मोदायत्वानंदायत्वामहसेत्वा॥७॥ तेजोसिते
जोमयिधेहिवीर्य्यमसिवीर्य्यंमयिधेहिबलमसिबलंमयिधेह्योजोस्योजोम
यिधेहि॥ मन्युरसिमन्युंमयिधेहिसहोसिसहोमयिधेहि॥८॥ याव्याघ्रंवि
षूचिकोभौवृकंचरक्षति॥ श्येनंपतत्रिणꣳसिꣳहꣳसेमंपात्वꣳहसः॥९॥
यदापिपेषमातरंपुत्रःप्रमुदितोधयन्॥ एतत्तदग्नेअनृणोभवाम्यहतौपि

तरौ मया ॥१०॥ संपृचस्थसम्माभद्रेणपृंक्त ॥ विपृचस्थविमापापेनपृंक्त ॥११॥
देवायज्ञमतन्वतभेषजंभिषजाश्विना ॥ वाचासरस्वती ॥ भिषगिंद्रायेंद्रियाणिद
धतः ॥१२॥ दीक्षायैरूपंशष्पाणिप्रायणीयस्यतोक्मानि ॥ क्रयस्यरूपꣳसोम णी
स्यलाजाः सोमांꣳशवोमधु ॥१३॥ आतिथ्यरूपंमासरं महावीरस्यनग्नहुः ॥
रूपमुपसदामेतत्तिस्रोरात्रीः सुरासुता ॥१४॥ सोमस्यरूपंक्रीतस्यपरिस्रु
२ त्परिषिच्यते ॥ अश्विभ्यांदुग्धंभेषजमिंद्रायैंद्रꣳसरस्वत्या ॥१५॥ आसंदी
रूपꣳराजासंद्यैवेद्यैकुंभीसुराधानी ॥ अंत रउत्तरवेद्यारूपंकारोतरोभि २
षक् ॥१६॥ वेद्यावेदिः समाप्यतेबर्हिषाबर्हिरिंद्रियं ॥ यूपेनयूपऽआप्यतेप्रणी
तोऽअग्निरग्निना ॥१७॥ हविर्द्धानंयदश्विनाग्नीध्रंयत्सरस्वती ॥ इंद्रायैन्द्रं

ध्ंसदस्कृतंपत्नीशालंगार्हपत्यः ॥१८॥ प्रैषेभिःप्रैषानाप्नोत्याप्रीभिराप्रीर्य
ज्ञस्य ॥ प्रयाजेभिरनुयाजान्वषट्कारेभिराहुतीः ॥१९॥ पशुभिःपशूनाप्नोतिपुरो
डाशैर्हवींष्या ॥ छंदोभिःसामिधेनीर्याज्याभिर्वषट्कारान् ॥२०॥ धानाःकरंभः
सक्तवःपरीवापःपयोदधि ॥ सोमस्यरूपंहविषःआमिक्षावाजिनंमधु ॥२१॥
धानानांरूपंकुवलंपरीवापस्यगोधूमाः ॥ सक्तूनांरूपंबदरमुपवाकाःक
रम्भस्य ॥२२॥ पयसोरूपंयद्यवादध्नोरूपंकर्कंधूनि ॥ सोमस्यरूपंवाजिन
ंसौम्यस्यरूपमामिक्षा ॥२३॥ आश्रावयेतिस्तोत्रियाःप्रत्याश्रावोऽअनुरू
पः ॥ यजेतिधाय्यारूपंप्रगाथायेयजामहाः ॥२४॥ अर्धऋचैरुक्थानांरूपंप
दैराप्नोतिनिविदः ॥ प्रणवैःशस्त्राणांरूपंपयसासोमःऽआप्यते ॥ अश्विभ्यां

प्रातःसवनमिंद्रेणैंद्रंमाध्यंदिनं॥२५॥वैश्वदेवꣳसरस्वत्यातृतीयमाप्तꣳस
वनम्॥वायव्यैर्वायव्यान्याप्नोतिसतेनद्रोणकलशम्॥कुंभीभ्यामंभृणौसु
तेस्थालीभिःस्थालीराप्नोति॥२६॥यजुर्भिराप्यंतेग्रहाग्रहैस्तोमाश्चविष्टु
तीः॥छंदोभिरुक्थाशस्त्राणिसाम्नावभृथआप्यते॥२७॥इडाभिर्भक्षाना
प्नोतिसूक्तवाकेनाशिषः॥शंयुनापत्नीसंयाजान्त्समिष्टयजुषासꣳस्थां॥
२८॥व्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणाम्॥दक्षिणाश्रद्धामाप्नो

तिश्रद्धयासत्यमाप्यते॥२९॥एतावद्रूपंयज्ञस्ययद्देवैर्ब्रह्मणाकृतं॥तदे

तत्सर्वमाप्नोतियज्ञेसौत्रामणीसुते॥३०॥सुरावंतंबर्हिषदꣳसुवीरंयज्ञꣳ
हिंन्वंतिमहिषानमोभिः॥दधानास्सोमंदिविदेवतासुमदेमेंद्रंयजमानाःस्व

स क्रीः॥३१॥यस्तेरसस्संभृतऽओषधीषुसोमस्यशुष्मःसुरयासुतस्य।तेनजिन्व
यजमानंमदेनसरस्वतीमश्विनाऽइन्द्रमग्निं॥३२॥यमश्विनानमुचेरासुरादधि
सरस्वत्यसुनोदिंद्रियाय।इमंतꣳशुक्रंमधुमंतमिंदुꣳसोमꣳराजानमिहभ
क्षयामि॥३३॥यदत्रशिष्टꣳरसिनःसुतस्ययदिंद्रोऽअपिबच्छचीभिः॥अहं
तदस्यमनसाशिवेनसोमꣳराजानमिहभक्षयामि॥३४॥पितृभ्यःस्वधायि
भ्यःस्वधानमःपितामहेभ्यःस्वधायिभ्यःस्वधानमः॥प्रपितामहेभ्यःस्वधायि
भ्यःस्वधानमः॥३५॥अक्षन्पितरोमीमदंतपितरोतीतृपंतपितरः॥पि
तरःशुंधध्वं॥३६॥पुनंतुमापितरःसोम्यासःपुनंतुमापितामहाःपुनंतुप्र
पितामहाः॥पवित्रेणशतायुषा॥३७॥पुनंतुमापितामहाःपुनंतुप्रपिता

महाः॥पवित्रेणशतायुषाविश्वमायुर्व्यश्नवै॥३७॥ अग्नऽआयूंषिपवसऽ
आसुवोर्ज्जमिषंचनः॥आरेबाधस्वदुच्छुनां॥३८॥पुनंतुमादेवजनाःपुनं
तुमनसाधियः॥पुनंतुविश्वाभूतानिजातवेदःपुनीहिमा॥३९॥पवित्रेणपु
नीहिमाशुक्रेणदेवदीद्यत॥अग्नेक्रत्वाक्रतूंऽरनु॥४०॥यत्तेपवित्रमर्चिष्य
ग्नेविततमंतरा॥ब्रह्मतेनपुनातुमा॥४१॥पवमानःसोऽअद्यनःपवित्रेण
४ विचर्षणिः॥यःपोतासपुनातुमा॥४२॥उभाभ्यांदेवसवितःपवित्रेणसवे
नेच॥मांपुनीहिविश्वतः॥४३॥वैश्वदेवीपुनतीदेव्यागाद्यस्यामिमाबह्व्यः ४
स्तन्वोवीतपृष्ठाः॥तयामदंतःसधमाद्येषुवयंस्यामपतयोरयीणाम्॥४४॥
येसमानाःसमनसःपितरोयमराज्ये॥तेषांल्लोकःस्वधानमोयज्ञोदेवेषुक

स्तानाम्॥४६॥ ये समानाः समनसो जीवा जीवेषु मामकाः॥ तेषां श्रीर्मयि
कल्पतामस्मिंल्लोके शतं समाः॥४७॥ द्वे सृती अश्रृणवं पितृणामहं देवाना
मुत मर्त्यानां॥ ताभ्यामिदं विश्वमेजत्समेति यदंतरा पितरं मातरं च॥४८॥ इ
दं हविः प्रजननं मे अस्तु दशवीरं सर्वगणं स्वस्तये॥ आत्मसनि प्रजा
सनि पशुसनि लोकसन्यभयसनि॥ अग्निः प्रजां बहुलां मे करोत्वन्नं पयो
रेतो अस्मासु धत्त॥४९॥ उदीरतामवर उत्परास उन्मध्यमाः पितरः सो
म्यासः॥ असुं य ईयुरवृका ऋतज्ञास्ते नो वंतु पितरो हवेषु॥५०॥ त्वं सो
म प्र चिकितो मनीषा त्वं रजिष्ठमनु नेषि पंथां॥ तव प्रणीती पितरो नः
इंदो देवेषु रत्नमभजंत धीराः॥५१॥ त्वया हि नः पितरः सोम पूर्वे कर्माणि

चक्रुःपवमानधीराः॥वन्वन्नवातःपरिधीँरपोर्णुवीरेभिरश्वैर्मघवाभवा
नः॥५३॥त्वँसोमपितृभिःसंविदानोनुद्यावापृथिवीऽआततंथ॥तस्मै
तऽइंदोहविषाविधेमवयँस्यामपतयोरयीणां॥५४॥बर्हिषदःपितरः
ऊत्यर्वागिमावोहव्याचकृमाजुषध्वं॥तऽआगतावसाशंतमेनाथानः
शंय्योररपोदधात॥५५॥उपहूताःपितरःसोम्यासोबर्हिष्येषुनिधि
५ षुप्रियेषु॥तऽआगमंतुतऽइहश्रुवंत्वधिब्रुवंतुतेवंत्वस्मान्॥५६॥आहं ५
पितॄंत्सुविदत्रांऽअवित्सिनपातंचविक्रमणंचविष्णोः॥बर्हिषदोयेस्व
धयासुतस्यभजंतपित्वस्तऽइहागमिष्ठाः॥५७॥अग्निष्वात्ताःपितरः
एहगच्छतसदःसदःसदतसुप्रणीतयः॥अत्ताहवीँषिप्रयतानिब

र्हिष्मथा रयिं सर्ववीरं दधातन ॥५८॥ आयंतु नः पितरः सोम्यासोग्निष्वा
त्ताः पथिभिर्देवयानैः ॥ अस्मिन्यज्ञे स्वधया मदंतोधिब्रुवंतु तेवंत्वस्मान् ॥
५९॥ ये अग्निष्वात्ता ये अनग्निष्वात्ता मध्ये दिवः स्वधया मादयंते ॥ तेभ्यः
स्वराळसुनीतिमेतां यथावशं तन्वं कल्पयाति ॥६०॥ अग्निष्वात्तानृतुमतो
हवामहे नाराशंसे सोमपीथं य आशुः ॥ ते नो विप्रासः सुहवा भवंतु वय
ꣳस्याम पतयो रयीणाम् ॥६१॥ आच्या जानु दक्षिणतो निषद्येमं यज्ञमभि
गृणीत विश्वे ॥ मा हिꣳसिष्ट पितरः केनचिन्नो यद्व आगः पुरुषता कराम ॥
६२॥ आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय ॥ पुत्रेभ्यः पि
तरः तस्य वस्वः प्रयच्छत ते इहोर्जं दधात ॥६३॥ यमग्ने कव्यवाहन त्वं चिन्म

न्येसिरयिम्॥तन्नोगीर्भिःश्रवाय्यंदेवत्रापनयायुजम्॥६४॥योऽअग्निःकव्य
वाहनःपितॄन्यक्षदृतावृधः॥प्रेदुहव्यानिवोचतिदेवेभ्यश्चपितृभ्यऽआ॥६५॥
त्वमग्नऽईडितोजातवेदोवाड्ढव्यानिसुरभीणिकृत्वी॥प्रादाःपितृभ्यःस्वध
यातेऽअक्षन्नद्धित्वंदेवप्रयताहवीꣳषि॥६६॥इदंपितृभ्योनमोऽअस्त्वद्यये
पूर्वासोयऽउपरासईयुः॥येपार्थिवेरजस्यानिषत्तायेवानूनꣳसुवृजना
सुविक्षु॥६७॥येचेहपितरोयेचनेहयाꣳश्चविद्मयाँ२॥उचनप्रविद्म॥त्वं
वेत्थयतितेजातवेदःस्वधाभिर्यज्ञꣳसुकृतंजुषस्व॥६८॥अधायथानः
पितरःपरासःप्रत्नासोऽअग्नऽऋतमाशुषाणाः॥शुचीदयंदीधितिमु
क्थशासःक्षामाभिंदंतोऽअरुणीरपव्रन्॥६९॥उशंतस्त्वानिधीमह्युशं

तःसमिधीमहि॥उशन्नुशतऽआवहपितॄन्हविषेऽअत्तवे॥७०॥अपांफेनेननमुचेः
शिरऽइन्द्रोदवर्त्तयः॥विश्वायदजयस्पृधः॥७१॥सोमोराजामृतꣳसुतऋजी
षेणाजहान्मृत्युं॥ऋतेनसत्यमिंद्रियंविपानꣳशुक्रमंधसऽइंद्रस्येंद्रिय
मिदंपयोमृतंमधु॥७२॥अद्भ्यःक्षीरंव्यपिबत्क्रुङ्ङाङ्गिरसोधिया॥ऋतेन
सत्यमिंद्रियंविपानꣳशुक्रमंधसऽइंद्रस्येंद्रियमिदंपयोमृतंमधु॥७२
सोममद्भ्योव्यपिबच्छंदसाहꣳसःशुचिषत्॥ऋतेनसत्यमिंद्रियंविपानꣳ
शुक्रमंधसऽइंद्रस्येंद्रियमिदंपयोमृतंमधु॥अन्नात्परिस्रुतोरसंब्रह्मणा
व्यपिबत्क्षत्रंपयःसोमंप्रजापतिः॥ऋतेनसत्यमिंद्रियंविपानꣳशुक्रमं
धसऽइंद्रस्येंद्रियमिदंपयोमृतंमधु॥७३॥रेतोमूत्रंविजहातियोनिंप्रविश

दिंद्रियं ॥ गर्भोजरायुणावृतउल्बंजहातिजन्मना ॥ ऋतेनसत्यमिंद्रियंवि
पानꣳशुक्रमंधसऽइंद्रस्येंद्रियमिदंपयोमृतंमधु ॥ ७४ ॥ दृष्ट्वारूपेव्याकरो
त्सत्यानृतेप्रजापतिः ॥ अश्रद्धामनृतेदधाच्छ्रद्धाꣳसत्येप्रजापतिः ॥ ऋते
नसत्यमिंद्रियंविपानꣳशुक्रमंधसऽइंद्रस्येंद्रियमिदंपयोमृतंमधु ॥ ७५ ॥
७ वेदेनरूपेव्यपिबत्सुतासुतौप्रजापतिः ॥ ऋतेनसत्यमिंद्रियंविपानꣳशु
क्रमंधसऽइंद्रस्येंद्रियमिदंपयोमृतंमधु ॥ ७६ ॥ दृष्ट्वापरिस्रुतोरसꣳशु ७
क्रेणशुक्रंव्यपिबत्पयःसोमंप्रजापतिः ॥ ऋतेनसत्यमिंद्रियंविपानꣳ
शुक्रमंधसऽइंद्रस्येंद्रियमिदंपयोमृतंमधु ॥ ७६ ॥ सीसेनतंत्रंमनसाम
नीषिणऽऊर्णासूत्रेणकवयोवयंति ॥ अश्विनायज्ञꣳसवितासरस्वती

न्द्रस्यरूपंवरुणोभिषज्यन्॥७७॥तदस्यरूपममृतंशचीभिस्तिस्रोदधुर्दे
वताःसंरराणाः॥लोमानिशष्पैर्बहुधानतोक्मभिस्त्वगस्यमांसमभवन्न
लाजाः॥७८॥तदश्विनाभिषजारुद्रवर्त्तनीसरस्वतीवयतिपेशोअन्तरं॥अ
स्थिमज्जानंमासरैःकारोतरेणदधतोगवांत्वचि॥७९॥सरस्वतीमनसापेशलंवसुना
सत्याभ्यांवयतिदर्शतंवपुः॥रसंपरिस्रुतानरोहितंनग्नहुर्धीरस्तसरंनवेम॥८
पयसाशुक्रममृतंजनित्रंसुरयामूत्राज्जनयन्तरेतः॥अपामतिंदुर्मतिंबाधमा
नाऊवध्यंवातंसब्वंतदारात्॥८१॥इन्द्रःसुत्रामाहृदयेनसत्यंपुरोळाशेन
सविताजजान॥यकृत्क्लोमानंवरुणोभिषज्यन्मतस्नेवायव्यैर्नमिनातिपित्त
म्॥८२॥आन्त्राणिस्थालीर्मधुपिन्वमानागुदाःपात्राणिसुदुघानधेनुः॥

६

श्येनस्यपत्रन्नप्लीहाशचीभिरासंदीनाभिरुदरन्नमाता॥८३॥कुंभोवनिष्ठुर्जनि
ताशचीभिर्यस्मिन्नग्रेयोन्यांगर्भोअंतः॥प्लाशिर्व्यक्तःशतधारउत्सोदुहेन
कुंभीस्वधांपितृभ्यः॥८४॥मुखꣳसदस्यशिरइत्सतेनजिह्वापवित्रमश्विनासन्त्स
रस्वती॥चप्यन्नपायुर्भिषगस्यवालोवस्तिर्नशेपोहरसातरस्वी॥८५॥अश्वि
भ्यांचक्षुरमृतंग्रहाभ्यांछागेनतेजोहविषाशृतेन॥पक्ष्माणिगोधूमैःकुवलै
रुतानिपेशोनशुक्लमसितंवसाते॥८६॥अविर्नमेषोनसिवीर्यायप्राणस्य
पंथाअमृतोग्रहाभ्यां॥सरस्वत्युपवाकैर्व्यानंनस्यानिबर्हिर्बदरैर्जजान॥
८७॥इंद्रस्यरूपमृषभोबलायकर्णाभ्याꣳश्रोत्रममृतंग्रहाभ्यां॥यवानब
र्हिर्भ्रुविकेसराणिकर्कंधुजज्ञेमधुसारघंमुखात्॥८८॥आत्मन्नुपस्थेनवृक

६

स्यलोममुखेश्मश्रूणिनव्याघ्रलोम।केशानशीर्षन्यशसेश्रियैशिखासिꣳ
हस्यलोमत्विषिरिंद्रियाणि॥८९॥अंगान्यात्मन्भिषजातदश्विनात्मानमं
गैःसमधात्सरस्वती।इंद्रस्यरूपꣳशतमानमायुश्चंद्रेणज्योतिरमृतंदधा
नाः॥९०॥सरस्वतीयोन्यांगर्भमंतरश्विभ्यांपत्नीसुकृतंबिभर्ति।अपाꣳ
रसेनवरुणोनसाम्नेंद्रꣳश्रियैजनयन्नप्सुराजा॥९१॥तेजःपशूनाꣳहवि
रिंद्रियावत्परिस्रुतापयसासारघंमधु।अश्विभ्यांदुग्धंभिषजासरस्वत्या
सुतासुताभ्याममृतःसोमइंदुः॥९२॥क्षत्रस्यनाभिरसिक्षत्रस्ययोनिर
सि।मात्वाहिꣳसीन्मामाहिꣳसीः॥निषसादधृतव्रतोवरुणःपस्त्यास्वा।
साम्राज्यायसुक्रतुः॥मृत्योःपाहिविद्योत्पाहि॥देवस्यत्वासवितुःप्रसवेश्वि

नोर्बाहुभ्यांपूष्णोहस्ताभ्यां॥३॥अश्विनोर्भैषज्येनतेजसेब्रह्मवर्चसायाभि
षिंचामिसरस्वत्यैभैषज्येनवीर्यायान्नाद्यायाभिषिंचामि॥इंद्रस्येंद्रियेण
बलायश्रियैयशसेभिषिंचामि॥४॥कोसिकतमोसिकस्मैत्वाकायत्वा॥
सुश्लोकसुमंगलसत्यराजन्॥५॥शिरोमेश्रीर्यशोमुखंत्विषिःकेशाश्चश्म
श्रूणि॥राजामेप्राणो॥अमृतंसम्राट्चक्षुर्विराट्श्रोत्रम्॥६॥जिह्वा
मेभद्रंवाङ्महोमनोमन्युःस्वराड्भामः॥मोदाःप्रमोदाअंगुलीरंगानिमि
त्रंमेसहः॥७॥बाहूमेबलमिंद्रियंहस्तौमेवीर्यम्॥आत्माक्षत्रमुरो ९ कर्म
मम॥८॥पृष्टीर्मेराष्ट्रमुदरमंसौग्रीवाश्चश्रोणी॥ऊरूअरत्नीजा
नुनीविशोमेंगानिसर्वतः॥९॥नाभिर्मेचित्तंविज्ञानंपायुर्मेपचितिर्भ

सत॒।।आनंदंनंदाऽआंडौमेभगःसोभाग्यंपसः॥१००॥जंघाभ्यांपद्भ्यांधर्मोस्मि
विशिराजाप्रतिष्ठितः॥प्रतिक्षत्रेप्रतितिष्ठामिराष्ट्रे।प्रत्यश्वेषुप्रतितिष्ठामिगोषु।
१०१॥प्रत्यंगेषुप्रतितिष्ठाम्यात्मन्प्रतिप्राणेषुप्रतितिष्ठामिपुष्टे।प्रतिद्यावापृ
थिव्योःप्रतितिष्ठामियज्ञे॥१०२॥त्रयादेवाएकादशत्रयस्त्रिꣳशाःसुराधसः॥
बृहस्पतिपुरोहितादेवस्यसवितुःसवे।देवादेवैरवंतुमा॥१०३॥प्रथमाद्वितीयै
र्द्वितीयास्तृतीयैस्तृतीयाःसत्येन।सत्यंयज्ञेनयज्ञोयजुर्भिर्यजुꣳषिसामभिः॥
१०४॥सामान्यृग्भिर्ऋचःपुरोनुवाक्याभिःपुरोनुवाक्यायाज्याभिर्याज्यावषट्का
रैः॥वषट्काराऽआहुतिभिराहुतयोमेकामान्समर्द्धयंतुभूःस्वाहा॥१०५॥लोमा
निप्रयतिर्ममत्वङ्मऽआनतिरागतिः॥मांꣳसम्मऽउपनतिर्वस्वस्थिमज्जामऽआ

नेति॥१०६॥ ॥इतिकाण्वपाठेसप्तानुवाकेषुषडोत्तरएकविंशतिमोध्या
यः॥हरिः॥ ॐ म्॥यद्देवादेवहेळनंदेवासश्चकृमावयम्॥अग्निर्मात
स्मादेनसोविश्वान्मुंचत्वंहसः॥१॥यदिदिवायदिनक्तमेनांसिचकृ
मावयम्॥वायुर्मातस्मादेनसोविश्वान्मुंचत्वंहसः॥२॥यदिजाग्रद्यदि
१० स्वप्नएनांसिचकृमावयम्॥सूर्योमातस्मादेनसोविश्वान्मुंचत्वंहसः॥ १०
३॥यद्ग्रामेयदरण्येयत्सभायांयदिंद्रिये॥यच्छूद्रेयदर्येयदेनश्चकृमावय
म्॥यदेकस्याधिधर्मणितस्यावयजनमसि॥यदापोअघ्न्याइतिवरु
णेतिशपामहेततोवरुणनोमुंच॥अवभृथनिचुंपुणनिचेरुरसिनिचुं
पुण॥अवदेवैर्देवकृतमेनोयक्ष्यवमर्त्यैर्मर्त्यकृतंपुरुराव्णोदेवारिषस्पा

स्पाहि॥ समुद्रेतेहृदयमप्स्वंतः संत्वाविशंतोषधीरुतापः॥ सुमित्रियानऽआपः
ओषधयः संतुदुर्मित्रियास्तस्मैसंतु॥ योस्मान्द्वेष्टियंचवयंद्विष्मः॥४॥ द्रुपदादि
वमुमुचानः स्विन्नः स्नातोमलादिव॥ पूतंपवित्रेणेवाज्यमापः शुंधंतुमैनसः॥
५॥ उद्वयंतमसस्परिस्वः पश्यंतउत्तरं॥ देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमम्॥६॥
आपोऽअद्यान्वचारिषंरसेनसमसृक्ष्महि॥ पयस्वानग्नऽआगमंतंमासंसृ
सृजवर्चसाप्रजयाचधनेनच॥ एधोस्येधिषीमहिसमिदसितेजोसितेजोम
यिधेहि॥७॥ समाववर्त्तिपृथिवीसमुषाः समुसूर्यः॥ समुविश्वमिदंजगत्॥
वैश्वानरज्योतिर्भूयासंविभुंकामान्व्यश्नवैभूः स्वाहा॥८॥ अभ्यादधामिस
मिधमग्नेव्रतपतेत्वयि॥ व्रतंचश्रद्धांचोपैमींधेत्वादीक्षितोऽअहम्॥९॥ यत्र

ब्रंह्मचक्षत्रंचसंम्यंचौचरतःसह।तंलोकंपुण्यंप्रज्ञेषंयत्रदेवाःसहाग्निना॥१०
यत्रेंद्रश्चवायुश्चसंम्यंचौचरतःसह।तंलोकंपुण्यंप्रज्ञेषंयत्रसेदिर्नविद्य
ते॥११॥अंशुनातेऽअंशुःपृच्यतांपरुषापरुः॥गंधस्तेसोममवतुमदा
यरसोऽअच्युतः॥१२॥सिंचंतिपरिषिंचंत्युत्सिंचंतिपुनंतिच॥सुरायै
बभ्र्वैमदेकिंत्वोवदतिकिंत्वः॥१३॥धानावंतंकरंभिणमपूपवंतमुक्थिनं॥
इंद्रप्रातर्जुषस्वनः॥१४॥बृहदिंद्रायगायतमरुतोवृत्रहंतमं॥येनज्यो
तिरजनयन्नृतावृधोदेवंदेवायजागृवि॥१५॥अध्वर्योऽअद्रिभिःसुतं
सोमंपवित्रऽआनय॥पुनीहीन्द्रायपातवे॥१६॥योभूतानामधिपति
र्यस्मिन्ल्लोकाऽअधिश्रिताः॥यईशेमहतोमहांस्तेनगृह्णामित्वामहं

मयिगं ह्वामि त्वामहं ।। १७ ।। उपयामगृहीतोस्यश्विभ्यांत्वासरस्वत्यैत्वेंद्रायत्वा
सुत्राम्णे । एषतेयोनिरश्विभ्यांत्वासरस्वत्यैत्वेंद्रायत्वासुत्राम्णे ।। १८ ।। प्राणपामे
अपानपाश्चक्षुष्पाः श्रोत्रपाश्चमे । वाचोमेविश्वभेषजोमनसोसिविलायकः ।।
१९ ।। अश्विनकृतस्यतेसरस्वतिकृतस्येंद्रेणसुत्राम्णाकृतस्य । उपहूतउपहू
तस्यभक्षयामि ।। २० ।। समिद्धइंद्रउषसामनीके पुरोरुचापूर्वकृद्वावृधानः ।। त्रि
भिर्देवैस्त्रिंशतावज्रबाहुर्जघानवृत्रंविदुरोववार ।। २१ ।। नराशंसः प्र
तिशूरोमिमानस्तनूनपात्प्रतियज्ञस्यधाम । गोभिर्वपावान्मधुनासमंज
न्हिरण्यैश्चंद्रीयजतिप्रचेताः ।। २२ ।। ईडितोदेवैर्हरिवांअभिष्टिराजुह्वानो
हविषाशर्द्धमानः ।। पुरंदरोगोत्रभिद्वज्रबाहुरायातुयज्ञमुपनोजुषाणः ।। २३

जुषाणोबर्हिर्हरिवान्नइंद्रःप्राचीनꣳसीदत्प्रदिशापृथिव्याः॥उरुप्रथाःप्रथ
मानꣳस्योनमादित्यैरक्तंवसुभिःसजोषाः॥२४॥इंद्रंदुरःकवष्योधावमाना
वृषाणंयंतुजनयःसुपत्नीः॥द्वारोदेवीरभितोविश्रयंताꣳसुवीरावीरंप्रथ
मानामहोभिः॥२५॥उषासानक्ताबृहतीबृहंतंपयस्वतीसुदुघेशूरमिंद्रम्॥
तंतुंततंपेशसासंवयंतीदेवानांदेवंयजतःसुरुक्मे॥२६॥दैव्यामिमाना
मनुषःपुरुत्राहोताराविंद्रंप्रथमासुवाचा॥मूर्द्धन्यज्ञस्यमधुनादधाना
प्राचीनंज्योतिर्हविषावृधातः॥२७॥तिस्रोदेवीर्हविषावर्द्धमानाइंद्रंजु
षाणाजनयोनपत्नीः॥अच्छिन्नंतंतुंपयसासरस्वतीडादेवीभारतीविश्व
तूर्त्तिः॥२८॥त्वष्टादधच्छुष्ममिंद्रायवृष्णेपाकोचिष्टुर्यशसेपुरूणि॥वृषा

यज्ञन्वर्षणंभरिरेतांमूर्द्धन्यज्ञस्यसमनक्तुदेवान्॥१९॥वनस्पतिरवसृष्टोन
पाशैस्त्मन्यासमंजंछमितानदेवः॥इंद्रस्यहव्यैर्जठरंपृणानःस्वदातियज्ञंमधु
नाघृतेन॥२०॥स्तोकानामिंदुंप्रतिशूरइंद्रोवृषायमाणोवृषभस्तुराषाट्॥घृ
तप्रुषामनसामोदमानाःस्वाहादेवाऽअमृतामादयंताम्॥२१॥आयात्विंद्रोव
सउपनइहस्तुतःसधमादस्तुशूरः॥वावृधानस्तविषीर्यस्यपूर्वीर्द्यौर्नक्ष
त्रमभिभूतिपुष्यात्॥२२॥आनइंद्रोदूरादानःआसादभिष्टिकृदवसेयास
दुग्रः॥ओजिष्ठेभिर्नृपतिर्वज्रबाहुःसंगेसमत्सुतुर्वणिःपृतन्यून्॥२३॥आ
नइंद्रोहरिभिर्यात्वच्छार्वाचीनोवसेराधसेच॥तिष्ठातिवज्रीमघवाविरप्शीमं
यज्ञमनुनोवाजसातौ॥२४॥त्रातारमिंद्रमवितारमिंद्रंहवेहवेसुहवंशूर

मिंद्रम॥ह्वयामिशक्रंपुरुहूतमिंद्रंऽस्वस्तिनोमघवाधात्विंद्रः॥३५॥इंद्रःसुत्रा
मास्ववाँऽअवोभिःसुमृळीकोभवतुविश्ववेदाः॥बाधतांद्वेषोऽअभयंकृणोतु
सुवीर्यस्यपतयस्याम॥३६॥तस्यवयंसुमतौयज्ञियस्यापिभद्रेसौमन
सेस्याम॥ससुत्रामास्ववाँऽइंद्रोऽअस्मेऽआराच्चिद्द्वेषःसनुतर्युयोतु॥३७॥
आमंद्रैरिंद्रहरिभिर्याहिमयूररोमभिः॥मात्वाकेचिन्नियमन्विंनपाशि
नोतिधन्वेवतांऽइहि॥३८॥एवेदिंद्रंवृषणंवज्रबाहुंवसिष्ठासोऽअभ्यर्चं
त्यर्कैः॥सनस्तुतोवीरवद्धातुगोमद्यूयंपातस्वस्तिभिःसदानः॥३९॥स
मिद्धोऽअग्निरश्विनातप्तोघर्मोविराट्सुतः॥दुहेधेनुःसरस्वतीसोमंऽ
शुक्रमिहेंद्रियं॥४०॥तनूनपाभिषजासुतेऽश्विनोभासरस्वती॥मध्वारजा

ꣳसीन्द्रियमिंद्रायपथिभिर्वहान्॥४१॥इंद्रायेन्दुꣳसरस्वतीनराशꣳसेननग्न
हुं॥अधातामश्विनामधुभेषजंभिषजासुते॥४२॥आजुह्वानासरस्वतीन्द्रायेन्द्रि
याणिवीर्यम्॥इळाभिरश्विनाइषꣳसमूर्जꣳसꣳरयिंदधुः॥४३॥अश्विनान
मुचेः सुतꣳसोमꣳशुक्रंपरिस्रुता॥सरस्वतीतमाभरद्बर्हिषेंद्रायपातवे॥४४॥
कवष्योनव्यचस्वतीरश्विभ्यान्नदुरोदिशः॥इंद्रोनरोदसी॥उभेदुहेकामान्सरस्व
ती॥४५॥उषासानक्तमश्विनादिवेंद्रꣳसायमिंद्रि॥यैः॥संजानानेसुपेशसा
समंजातेसरस्वत्या॥४६॥पातन्नोअश्विनादिवापाहिनक्तꣳसरस्वति॥दै
व्याहोतारा॥भिषजापातमिंद्रꣳसचासुते॥४७॥तिस्रस्त्रेधासरस्वत्यश्विना
भारतीळा॥तीव्रंपरिस्रुतासोममिंद्रायसुषुवुर्मदम्॥४८॥अश्विनाभेषजं

मधुभेषजन्नः सरस्वती ॥ इंद्रेत्वष्टायशः श्रियꣳरूपꣳरूपमधुः सुते ॥४९॥ ऋतु

म्र थेंद्रोवनस्पतिः शशमानः परिस्रुता ॥ कीलालमश्विभ्यांमधुदुहेधेनुः सरस्व

ती ॥५०॥ गोभिर्न्नसोममश्विनामासरेणपरिस्रुता ॥ समधातꣳसरस्वत्यास्वा

य हेंद्रेसुतंमधु ॥५१॥ अश्विनाहविरिंद्रियन्नमुचेर्द्धियासरस्वती ॥ आशुक्रमासु

१४ राद्वसुमघमिंद्रायजभ्रिरे ॥५२॥ यमश्विनासरस्वतीहविषेंद्रमवर्द्धयन् ॥ स १४

बिभेदवलंमघंनमुचाऽआसुरेसचा ॥५३॥ तमिंद्रंपशवः सचाश्विनोभास

रस्वती ॥ दधानाऽअभ्यनूषतहविषायज्ञइंद्रियैः ॥५४॥ यइंद्रइंद्रियंदधुः स

वितावरुणोभगः ॥ ससुत्रामाहविष्पतिर्यजमानायसश्चत ॥५५॥ सविता

वरुणोदधद्यजमानायदाशुषे ॥ आदत्तनमुचेर्वसुसुत्रामाबलमिंद्रियम् ॥५६

वरुणःक्षत्रमिंद्रियंभगेनसविताश्रियम्॥सुत्रामायशसाबलंदधानायज्ञमाश
त॥५७॥अश्विनागोभिरिंद्रियमश्वेभिर्वीर्यंबलम्॥हविषेंद्रꣳसरस्वतीयज
मानमवर्द्धयन्॥५८॥तानासत्यासुपेशसाहिरण्यवर्त्तनीनरा॥सरस्वतीहवि
ष्मतींद्रकर्म्मसुनोवत॥५९॥ताभिषजासुकर्म्मणासासुदुघासरस्वती॥सवृ
त्रहाशतक्रतुरिंद्रायदधुरिंद्रियम्॥६०॥युवꣳसुराममश्विनानमुचाऽआसुरे
सचा॥विपिपानाःसरस्वतींद्रंकर्म्मस्वावत॥६१॥पुत्रमिवपितराऽश्विनोभे
न्द्रावथुःकाव्यैर्दꣳसनाभिः॥यत्सुरामंव्यपिबःशचीभिःसरस्वतीत्वामघवन्न
भिष्णक्॥६२॥यस्मिन्नश्वासःऋषभासःउक्षणोवशामेषाऽअवसृष्टासऽआ
हुताः॥कीलालपेसोमपृष्ठायवेधसेहृदामतिंजनयचारुमग्नये॥६३॥अहाव्य

ग्नेहविरास्येनेस्रुचीवघृतंचंम्वीवसोमेः।।वाजसनिंरयिमस्मेसुवीरंप्रशस्तंधे
हियशसंबृहंतं।।६४।।अश्विनातेजसाचक्षुःप्राणेनसरस्वतीवीर्यम्।।वाचेंद्रो
बलेनेंद्रायदधुरिंद्रियम्।।६५।।गोमदूषुनासत्याश्वावद्यातमश्विना।।
वर्त्तीरुद्रानृपाय्यम्।।६६।।नयत्परोनांतरआदधर्षद्वृषण्वसू।।दुःशंसोम
र्त्योरिपुः।।६७।।तानआवोळ्हमश्विनारयिंपिशंगसंदृशं।।धिष्ण्यावरिवोवि
३५ दम्।।६८।।पावकानःसरस्वतीवाजेभिर्वाजिनीवती।।यज्ञंवष्टुधियावसुः।।६९ ३५
चोदयित्रीसूनृतानांचेतंतीसुमतीनाम्।।यज्ञंदधेसरस्वती।।७०।।महोअ
र्णःसरस्वतीप्रचेतयतिकेतुना।।धियोविश्वाविराजति।।७१।।इंद्रायाहिचित्र
भानोसुताइमेत्वायवः।।अण्वीभिस्तनापूतासः।।७२।।इंद्रायाहिधियेषितोवि

प्रजूतः सुतावतः ॥ उपब्रंह्माणि वाघतः ॥ ७३ ॥ इंद्रायाहि तूतुजान उपब्रंह्माणि
हरिवः ॥ सुते दधिष्व नश्चनः ॥ ७४ ॥ अश्विना पिबतां मधु सरस्वत्या सजोषसा ॥
इंद्रः सुत्रामा वृत्रहा जुषंतां सोम्यं मधु ॥ ७५ ॥ इति काण्वसंहितायां द्वाविंशति
मोध्यायः ॥ ७ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ श्रीमा ॥ हरिः ओं ॥ इमं मे वरुण श्रु
धी हवमद्या च मृळय ॥ त्वामवस्युराचके ॥ १ ॥ तत्त्वा यामि ब्रह्मणा वंदमानस्तदा
शास्ते यजमानो हविर्भिः ॥ अहेळमानो वरुणेह बोध्युरुशंस मा न आयुः
प्रमोषीः ॥ २ ॥ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेळो अव यासिसीष्ठाः ॥ य
जिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् ॥ ३ ॥ स त्वन्नो अ
ग्ने वरुणस्य मो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ॥ अव यक्ष्व नो वरुणं

ररा॒णोवीतिमृडीकꣳसुहवोनऽएधि॥४॥महीमूषुमातरꣳसुव्रतानामृतस्य
पत्नीमवसेहुवेम॥तुविक्षत्रामजरंतीमुरूचीꣳसुशर्माणमदितिꣳसुप्रणीतिम्॥
५॥सुत्रामाणंपृथिवींद्यामनेहसꣳसुशर्माणमदितिꣳसुप्रणीतिम्॥दैवी
नावꣳस्वरित्रामनागसमस्रवंतीमारुहेमास्वस्तये॥६॥सुनावमारुहेयम
स्रवंतीमनागसम्॥शतारित्राꣳस्वस्तये॥७॥आनोमित्रावरुणाघृतैर्गव्यू

तिमुक्षतम्॥मध्वारजाꣳसिसुक्रतू॥८॥प्रबाहवासिसृतंजीवसेनऽआनो

गव्यूतिमुक्षतंघृतेन॥आमाजनेश्रवयतंयुवानाश्रुतंमेमित्रावरुणाहवे
मा॥९॥शन्नोभवंतुवाजिनोहवेषुदेवतातामितद्रवःस्वर्काः॥जंभयंतोहिं
रकꣳरक्षाꣳसिसनेम्यस्मद्युयवन्नमीवाः॥१०॥तेनोऽर्वंतोहवनश्रुतोह

वं विश्वेभिरेवं तु वाजिनोऽमितक्रतवः॥ सहस्रसा मेधसाताऽइव त्मना महो ये धनं
समिथेषु जभ्रिरे ॥११॥ वाजेवाजेऽवत वाजिनो नो धनेषु विप्राऽअमृताऽऋतज्ञाः॥
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः॥१२॥ समिद्धोऽअग्निः
समिधा सुसमिद्धो वरेण्यः॥ गायत्री छंद इंद्रियं त्र्यविर्गौर्वयो दधुः॥१३॥ तनू
नपाच्छुचिव्रतस्तनूपाश्च सरस्वती॥ उष्णिहा छंद इंद्रियं दित्यवाङ्गौर्वयो द
धुः॥१४॥ इडाभिरग्निरीड्यः सोमो देवोऽअमर्त्यः॥ अनुष्टुप्छंद इंद्रियं
पंचाविर्गौर्वयो दधुः॥१५॥ सुबर्हिरग्निः पूषण्वान्स्तीर्णबर्हिरमर्त्यः॥ बृ
हती छंद इंद्रियं त्रिवत्सो गौर्वयो दधुः॥१६॥ दुरो देवीर्दिशो महीर्ब्रह्मा दे
वो बृहस्पतिः॥ पंक्तिश्छंद इहेंद्रियं तुर्यवाङ्गौर्वयो दधुः॥१७॥ उषे यह्वी सुपे

न्नासाविश्विनैर्देवाऽअमर्त्याः॥ त्रिष्टुपछंदइहेंद्रियंपष्ठवाङ्गौर्वयोदधुः॥१८॥ दैव्या
होताराभिषजेंद्रेणसयुजायुजा॥ जगतीछंदइंद्रियमनड्वांनौर्वयोदधुः॥१९॥
तिस्रइडासरस्वतीभारतीमरुतोविशः॥ विराट्छंदइहेंद्रियंधेनुर्गौर्नवयोदधुः॥
२०॥ त्वष्टातुरीपोऽअद्भुतइंद्राग्नीपुष्टिवर्द्धना॥ द्विपदाछंदइंद्रियमुक्षागौर्नव
योदधुः॥२१॥ शमितानोवनस्पतिःसविताप्रसुवन्भगम्॥ ककुप्छंदइहेंद्रियं
वशावेहद्वयोदधुः॥२२॥ स्वाहायज्ञंवरुणःसुक्षत्रोभेषजंकरत्॥ अतिछंदाइं
द्रियंबृहदृषभोगौर्वयोदधुः॥२३॥ वसंतेनऋतुनादेवावसवस्त्रिवृतास्तुताः॥
रथंतरेणतेजसाहविरिंद्रेवयोदधुः॥२४॥ ग्रीष्मेणऋतुनादेवारुद्राःपंचदशे
स्तुताः॥ बृहतायशसाबलंहविरिंद्रेवयोदधुः॥२५॥ वर्षाभिर्ऋतुनादित्यास्तो

मेसप्तदशेस्तुताः॥वैरूपेणविशौजसाहविरिंद्रेवयोधधुःदधुः२६॥शारदेन
ऋतुनादेवाएकविंशऋभवस्तुताः॥वैराजेनश्रियाश्रियंहविरिंद्रेवयो
दधुः॥२७॥हेमंतेनऋतुनादेवास्त्रिणवेमरुतस्तुताः॥बलेनशक्वरीःसहोह
विरिंद्रेवयोदधुः॥२८॥शैशिरेणऋतुनादेवास्त्रयस्त्रिंशेमृताःस्तुताः॥स
त्येनरेवतीःक्षत्रंहविरिंद्रेवयोदधुः॥२९॥प्रथमोनुवाकः॥होतायक्षत्समि
धाग्निमिडस्पदेश्विनेंद्रंसरस्वतीमजोधूम्रोनगोधूमैःकुवलैर्भेषजंमधु॥
शष्पैर्नतेजइंद्रियंपयःसोमःपरिस्रुताघृतंमधुव्यंत्वाज्यस्यहोतर्यज॥३०॥
होतायक्षत्तनूनपात्सरस्वतीमविर्मेषोनभेषजंपथामधुमताभरन्नश्वि
नेंद्रायवीर्यं॥बदरैरुपवाकाभिर्भेषजंतोक्मभिःपयःसोमःपरिस्रुताघृतं

म्मधुव्यंत्वाज्यस्यहोतर्यज॥३१॥होतायक्षन्नराशंसन्ननग्नहुंपतिंसुरयाभे
षजंमेषःसरस्वतीभिषग्रथोनचंद्र्यश्विनोर्वपाऽइंद्रस्यवीर्यंबदरैरुपवाका
भिर्भेषजंतोक्मभिःपयःसोमःपरिस्रुताघृतम्मधुव्यंत्वाज्यस्यहोतर्यज॥३२
होतायक्षदिडेईडितऽआजुह्वानःसरस्वतीमिंद्रंबलेनवर्द्धयन्नृषभेणगवें

द्रियमश्विनेंद्रायभेषजं॥यवैःकर्कंधुभिर्मधुलाजैर्नमासरंपयःसोमःप
रिस्रुताघृतंमधुव्यंत्वाज्यस्यहोतर्यज॥३३॥होतायक्षद्बर्हिरूर्णम्रदाभि

षङ्नासत्याभिषजाश्विनाश्वाशिशुमतीभिषग्धेनुःसरस्वतीभिषक्दुहः
इंद्रायभेषजंपयःसोमःपरिस्रुताघृतंमधुव्यंत्वाज्यस्यहोतर्यज॥३४॥हो
तायक्षद्दुरोदिशःकवष्योनव्यचस्वतीरश्विभ्यान्नदुरोदिशऽइंद्रोनरोदसी॥

दुघेदुहेधेनुःसरस्वत्यश्विनेंद्रायभेषजम्।शुक्रन्नज्योतिरिंद्रियंपयःसोमःपरिस्
रुताघृतंमधुव्यंत्वाज्यस्यहोतर्यज॥२५॥होतायक्षत्सुपेशसोषेनक्तंदिवाश्विना
समंजातेसरस्वत्यात्विषिमिंद्रेनभेषजम्।श्येनोनरंहसाहृदाश्रियानमासरं
पयःसोमःपरिस्रुताघृतंमधुव्यंत्वाज्यस्यहोतर्यज॥२६॥होतायक्षद्दैव्याहोता
राभिषजाश्विनेंद्रन्नजागृविदिवानक्तन्नभेषजैः।शूषंसरस्वतीभिषक्सीसे
नदुहइंद्रियंपयःसोमःपरिस्रुताघृतंमधुव्यंत्वाज्यस्यहोतर्यज॥२७॥होताय
क्षत्तिस्रोदेवीर्न्नभेषजंत्रयस्त्रिधातवोपसोरूपमिंद्रेहिरण्ययमश्विनेडा
नभारतीवाचासरस्वतीमहइंद्रायदुहइंद्रियंपयःसोमःपरिस्रुताघृतंमधु
व्यंत्वाज्यस्यहोतर्यज॥२८॥होतायक्षत्सुरेतसमृषभंनर्यापसंत्वष्टारमिंद्र

मश्विनाभिषजेन्द्रंसरस्वतीभोजोनजूतिरिंद्रियंवृकोनरभसोभिषक्॥यशःसु
रयाभेषजꣳश्रियानमासरंपयःसोमःपरिस्रुताघृतंमधुव्यंत्वाज्यस्यहोत
र्यज॥३९॥होतायक्षद्वनस्पतिꣳशमितारꣳशतक्रतुंभीमन्नमन्युꣳराजानं
व्याघ्रंनमसाश्विना॥भामꣳसरस्वतीभिषगिंद्रायदुहइंद्रियंपयःसोमःप
२१ रिस्रुताघृतंमधुव्यंत्वाज्यस्यहोतर्यज॥४०॥होतायक्षदग्निꣳस्वाहाज्यस्य
स्तोकानाꣳस्वाहामेदसांपृथक्स्वाहाछागमश्विभ्याꣳस्वाहामेषꣳसरस्व २१
त्यै॥स्वाहऽऋषभमिंद्रायसिꣳहायसहसइंद्रियꣳस्वाहाग्निन्नभेषजꣳ
स्वाहासोममिंद्रियं॥स्वाहेंद्रꣳसुत्रामाणꣳसवितारंवरुणंभिषजांपतिꣳ
स्वाहावनस्पतिंप्रियंपाथोनभेषजं॥स्वाहादेवाऽआज्यपाजुषाणाऽअग्नि

भैषजंपयःसोमःपरिस्रुताघृतंमधुव्यंत्वाज्यस्यहोतर्यज॥४१॥होतायक्षदश्वि
नौछागस्यवपायामेदसोजुषेतांहविर्होतर्यज।होतायक्षत्सरस्वतीम्मेष
स्यवपायामेदसोजुषतांहविर्होतर्यज।होतायक्षदिंद्रमृषभस्यवपायामेद
सोजुषतांहविर्होतर्यज॥४२॥होतायक्षदश्विनौसरस्वतीमिंद्रंसुत्रामाण
मिमेसोमाःसुरामाणश्छागैर्नमेषैरृषभैःसुताः॥शष्पैर्नतोक्मभिर्लाजैर्म
हस्वंतोमदामासरेणपरिष्कृताः॥शुक्राःपयस्वंतोमृताःप्रस्थितावोमधुश्चु
तस्तानश्विनासरस्वतींद्रःसुत्रामावृत्रहाजुषंतांसोम्यंमधु॥पिबंतुमदं
तु तुव्यंत्वाज्यस्यहोतर्यज॥४३॥होतायक्षदश्विनौछागस्यहविषआत्ताम
द्यमध्यतोमेदउद्भृतंपुराद्वेषोभ्यःपुरापौरुषेय्यागृभः॥घस्तान्नूनंघा

सेःऽज्रा णांयवसप्रथमानाꣳसुमत्क्षराणाꣳशतरुद्रियाणामग्निष्वात्तानां
पीवोपवसनानां।।पार्श्वतःश्रोणितःशितामतुत्सादतोऽङ्गादंगादवत्तानांकर
तःएवाश्विनाजुषेताꣳहविर्होतर्यज।।होतायक्षत्सरस्वतीम्मेषस्यहविषःऽआवय
दद्यमध्यतोमेदऽउद्भृतंपुराद्वेषोभ्यःपुरापौरुषेय्यागृभः।।घसन्नूनंघासेऽज्रा
णांयवसप्रथमानाꣳसुमत्क्षराणाꣳशतरुद्रियाणामग्निष्वात्तानांपीवो

पवसनानाम्।।पार्श्वतःश्रोणितःशितामतुत्सादतोऽङ्गादंगादवत्तानांकर
देवꣳसरस्वतीर्जुषताꣳहविर्होतर्यज।।४४।।होतायक्षदिंद्रमृषभस्यहवि

षःऽआवयदद्यमध्यतोमेदऽउद्भृतंपुराद्वेषोभ्यःपुरापौरुषेय्यागृभः।।घसन्नू
नंघासेःऽज्राणांयवसप्रथमानाꣳसुमत्क्षराणाꣳशतरुद्रियाणामग्निष्वा

त्तानांपीवोपवसनानाम्।पार्श्वतःश्रोणितःशितामतउत्सादतोंगादंगादवत्ता
नांकरदेवमिंद्रोजुषतांहविर्होतर्यज॥४५॥होतायक्षद्वनस्पतिमभिहिपिष्टत
मयारभिष्ठयारशनयाधित।।य त्राश्विनोश्छागस्यहविषःप्रियाधामानि
यत्रसरस्वत्यामेषस्यहविषःप्रियाधामानियत्रेंद्रस्यऋषभस्यहविषःप्रि
याधामानि॥यत्राग्नेःप्रियाधामानियत्रसोमस्यप्रियाधामानियत्रेंद्रस्यसु
त्राम्णःप्रियाधामानि।यत्रसवितुःप्रियाधामानियत्रवरुणस्यप्रियाधा
मानियत्रवनस्पतेःप्रियापाथांसि।यत्रदेवानामाज्यपानांप्रियाधामा
नियत्राग्नेर्होतुःप्रियाधामानि।तत्रैतान्प्रस्तुत्येवोपस्तुत्येवोपावस्रक्षद्र
भीयसइवकृत्वीकरदेवंदेवोवनस्पतिर्जुषतांहविर्होतर्यज॥४६॥होता

यक्षदग्निꣳस्विष्टकृतमयाळग्निरश्विनोश्छागस्य हविषः प्रियाधामान्ययाट्सर
स्वत्यामेषस्य हविषः प्रियाधामान्ययाळिंद्रस्यऋषभस्य हविषः प्रियाधामानि॥
ऽअयाळग्नेः प्रियाधामान्ययाट्सोमस्य प्रियाधामान्ययाळिंद्रस्यसुत्राम्णः
प्रियाधामानि॥ ऽअयाट्सवितुः प्रियाधामान्ययाड्वरुणस्य प्रियाधामान्यया
ड्वनस्पतेः प्रियापाथाꣳसि॥ ऽअयाड्देवानामाज्यपानां प्रियाधामानि यक्षदग्ने
र्होतुः प्रियाधामानि॥ यक्षत्स्वंमहिमानमा यजतामेज्याः इषः कृणोतु सो
ऽअध्वराजातवेदाजुषताꣳहविः होतर्यज॥ ४७॥ ८७॥ देवंबर्हिः सरस्वतीसु
देवमिंद्रे ऽअश्विना। तेजोनचक्षुरक्ष्योर्बर्हिषादधुरिंद्रियंवसुवनेवसुधेय
स्यव्यंतुयज॥ ४८॥ देवीर्द्वारो ऽअश्विनाभिषजेंद्रेसरस्वती। प्राणन्नवीर्यन्न

सिद्वारोदधुरिंद्रियंवसुवनेवसुधेयस्यव्यंतुयज्ञ॥४९॥देवीउषासानक्ताश्विनासु
त्रामेंद्रेसरस्वती॥बलंन्नवाचेमास्यउषाभ्यांदधुरिंद्रियंवसुवनेवसुधेयस्य
व्यंतुयज्ञ॥५०॥देवीजोष्ट्रीसरस्वत्यश्विनेंद्रमवर्द्धयन्॥श्रोत्रंन्नकर्णयोर्यशो॥
जोष्ट्रीभ्यांदधुरिंद्रियंवसुवनेवसुधेयस्यव्यंतुयज्ञ॥५१॥देवीऊर्जाहुतीदुघे
सुदुघेंद्रेसरस्वत्यश्विनाभिषजावतः॥शुक्रंन्नज्योतिस्तनयोराहुतीधत्त
इंद्रियंवसुवनेवसुधेयस्यव्यंतुयज्ञ॥५२॥देवादेवानांभिषजाहोतारा॥इंद्र
मश्विनावषट्कारैःसरस्वतीत्विषिंन्नहृदयेमतिम्॥होतृभ्यांदधुरिंद्रियंव
सुवनेवसुधेयस्यव्यंतुयज्ञ॥५३॥देवीस्तिस्रस्तिस्रोदेवीरश्विनेळासरस्व
ती॥शूषन्नमध्येनाभ्यामिंद्रायदधुरिंद्रियंवसुवनेवसुधेयस्यव्यंतुयज्ञ॥५४

देवऽइंद्रोनराशꣳसस्त्रिवरूथस्सरस्वत्याश्विभ्यामीयतेरथः॥रेतोनरूपमम्
तंजनित्रमिंद्रायत्वष्टादधदिंद्रियाणिवसुवनेवसुधेयस्यव्यंतुयज॥५५॥दे
वोदेवैर्वनस्पतिर्हिरण्यपर्णोअश्विभ्याꣳसरस्वत्यासुपिप्पलःइंद्रायपच्य
तेमधु॥ओजोनजूतिर्ऋषभोनभामंवनस्पतिर्नोदधदिंद्रियाणिवसुवने
वसुधेयस्यव्यंतुयज॥५६॥देवंबर्हिर्वारितीनामध्वरेस्तीर्णमश्विभ्यामूर्ण
म्रदाःसरस्वत्यास्योनमिंद्रतेसदः॥ईशायैमन्युꣳराजानंबर्हिषादधुरिंद्रि

यंवसुवनेवसुधेयस्यव्यंतुयज॥५७॥देवोअग्निःस्विष्टकृद्देवान्यक्षद्यथा

यथꣳहोताराविंद्रमश्विनावाचावाचꣳसरस्वतीमग्निꣳसोमꣳस्विष्टकृ
त्॥स्विष्टइंद्रःसुत्रामासवितावरुणोभिषगिष्टोदेवोवनस्पतिःस्विष्टादेवाः

आज्यपाः॥स्विष्टोअग्निरग्निनाहोताहोत्रेस्वि[illegible]दानोदधदिंद्रियमूर्ज्ज
मपचितिꣳस्वधांवसुवनेवसुधेयस्यव्यंतुयज॥५८॥अग्निमद्यहोतारमवृणी
तायंयजमानःपचन्पक्तीःपचंपुरोडाशान्बध्नन्नश्विभ्यांछागꣳसरस्वत्यैमे
षमिंद्रायऋषभꣳसुन्वन्नश्विभ्याꣳसरस्वत्याऽइंद्रायसुत्राम्णेसुरासोमान्॥५९॥
सूपस्थाऽअद्यदेवोवनस्पतिरभवदश्विभ्यांछागेनसरस्वत्यैमेषेणेंद्रायऋष
भेणाऽअक्षꣳस्तान्मेदस्तःप्रतिपचताऽगृभीषतावीवृधंतपुरोडाशैरपुरश्विना
सरस्वतीइंद्रःसुत्रामासुरासोमान्॥६०॥त्वामद्यऋषऽआर्षेयऋषीणांन्न
पादवृणीतायंयजमानोबहुभ्यऽआसंगतेभ्यऽएषमेदेवेषुवसुवार्यायक्ष्यतऽइ
ति॥तायादेवादेवदानान्यदुस्तान्यस्माऽआचशास्वाचगुरस्वेषितश्चहोतरसि

भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि ॥ ६१ ॥ षडनुवाकेषु षष्ठी ॥ इ
तिसंहितापाठे त्रयोविंशतितमोऽध्यायः ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ छ ॥ ॥ छ ॥
हरिः ॐ नमः ॥ तेजोसि शुक्रममृतमायुष्पा आयुर्मे पाहि ॥ देवस्य त्वा सवितुः
प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥ मादे ॥ १ ॥ इमामगृभ्णन्रशनामृतस्य
पूर्व आयुषि विदथेषु कव्या ॥ सा नो अस्मिन्सुत आबभूव ऋतस्य सामन्सरमा
२३ रपन्ती ॥ २ ॥ अभिधा असि भुवनमसि यन्तासि धर्ता ॥ स त्वमग्निं वैश्वानरं २२
सप्रथसं गच्छ स्वाहाकृतः स्वगा त्वा देवेभ्यः ॥ ३ ॥ प्रजापतये प्रेसन्त्रमश्वं भन्त्स्यामि
देवेभ्यः प्रजापतये तेन राध्यासम् ॥ तं बधान देवेभ्यः प्रजापतये तेन राध्नुहि ॥ ४ ॥
प्रजापतये त्वा जुष्टं प्रोक्षामीन्द्राग्निभ्यां त्वा जुष्टं प्रोक्षामि वायवे त्वा जुष्टं प्रोक्षा

मिविश्वेभ्यस्त्वादेवेभ्योजुष्टंप्रोक्षामिसर्वेभ्यस्त्वादेवेभ्योजुष्टंप्रोक्षामि॥४॥योऽअ
र्वंतंजिघांसतितमभ्यमीतिवरुणः॥परोमर्तःपरःश्वा॥५॥अग्नयेस्वाहासो
मायस्वाहापांमोदायस्वाहासवित्रेस्वाहावायवेस्वाहाविष्णवेस्वाहा।इंद्रा
यस्वाहाबृहस्पतयेस्वाहामित्रायस्वाहावरुणायस्वाहा॥६॥हिंकारायस्वाहा
हिंकृतायस्वाहाक्रंदतेस्वाहावक्रंदायस्वाहा।प्रोथतेस्वाहाप्रप्रोथायस्वा
हागंधायस्वाहाघ्रातायस्वाहा॥७॥निविष्टायस्वाहोपविष्टायस्वाहासंदि
तायस्वाहावल्गतेस्वाहा।आसीनायस्वाहाशयानायस्वाहास्वपतेस्वाहा
जाग्रतेस्वाहा॥८॥कूजतेस्वाहाप्रबुद्धायस्वाहाविजृंभमाणायस्वाहाविचृ
त्तायस्वाहा।संहानायस्वाहोपस्थितायस्वाहायनायस्वाहाप्रायणायस्वाहा। ना

९॥यतेस्वाहा।धावतेस्वाहोद्द्रावायस्वाहोद्द्रुतायस्वाहा।शूकारायस्वाहा।शूकृता
यस्वाहा।निषण्णायस्वाहोत्थितायस्वाहा॥१०॥जवायस्वाहा।बलायस्वाहा।वि
वर्त्तमानायस्वाहा।विवृत्तायस्वाहा।विधून्वानायस्वाहा।विधूतायस्वाहा।शुश्रू
षमाणायस्वाहा।शृण्वतेस्वाहा॥११॥ईक्षमाणायस्वाहे[illegible]तायस्वाहा।वी हिं
क्षितायस्वाहा।निमेषायस्वाहा।यदत्तितस्मैस्वाहा।यत्पिबतितस्मैस्वाहा।
२४ यन्मूत्रंकरोतितस्मैस्वाहा।कुर्वतेस्वाहा।कृतायस्वाहा॥१२॥तत्सवितुर्वरे २८
ण्यंभर्गोदेवस्यधीमहि।धियोयोनःप्रचोदयात्॥१३॥हिरण्यपाणिमूत
येसवितारमुपह्वये।सचेत्तादेवतापदम्॥१४॥देवस्यचेततोमहींप्रसवि
तुर्हवामहे।सुमतिंसत्यराधसम्॥१५॥सुष्टुतिंसुमतीवृधोरातिंसवि

नुरीमहे॥ अग्नेदेवायमन्नीतिविद्रो॥१६॥ रातिꣳसत्पतिंमहेसवितारमुपह्वये। आस
वंदेववीतये॥१७॥ देवस्यसवितुर्मतिमासवंविश्वदेव्यम्॥ धियाभगंमनामहे।
१८॥ अग्निꣳस्तोमेनबोधयसमिधानोऽअमर्त्यं। हव्यादेवेषुनोदधत्॥१९॥ सह
व्यवाळमर्त्यउशिग्दूतश्चनोहितः॥ अग्निर्द्धियासमृण्वति॥२०॥ तंत्वाघृतस्नः
ईमहेचित्रभानोस्वर्विदम्॥ देवाँऽआवीतयेवह॥२१॥ अग्निंदूतंपुरोदधेहव्य
वा० हु मुपब्रुवे॥ देवांऽआसादयादिह॥२२॥ अजीजनोहिपवमानसूर्यंविधारेशक्मना
पयः॥ गोजीरयारꣳहमाणःपुरंध्या॥२३॥ विभूर्मात्राप्रभूःपित्राश्वोसिहयोस्य
त्योसिमयोस्यर्वासिसप्तिरसिवाज्यसिवृषासिनृमणाऽअसि। ययुर्नामासि
शिशुर्नामास्यादित्यानांपत्वान्विहि॥२४॥ देवाऽआशापालाऽएतंदेवेभ्योश्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेधायप्रोक्षितꣳरक्षत।इहरंतिरिहरमतामिहधृतिरिहस्वधृतिःस्वाहा॥२५
कायस्वाहा।कस्मैस्वाहा।कतमस्मैस्वाहा॥स्वाहाधिमाधीतायस्वाहा।मनःप्रजा
पतयेस्वाहा।चित्तंविज्ञाताय॥२६॥अदित्यैस्वाहा।अदित्यैमह्यैस्वाहा।अदित्यैसुमृ
डीकायैस्वाहा।सरस्वत्यैस्वाहा।सरस्वत्यैपावकायैस्वाहा।सरस्वत्यैबृहत्यै
स्वाहा॥२७॥पूष्णेस्वाहा।पूष्णेप्रपथ्यायस्वाहा।पूष्णेनरंधिषायस्वाहा।त्व
ष्ट्रेस्वाहा।त्वष्ट्रेतुरीपायस्वाहा।त्वष्ट्रेपुरुरूपायस्वाहा॥विष्णवेस्वाहा।विष्णवे
निभूयपायस्वाहा।विष्णवेशिपिविष्टायस्वाहा॥२८॥विश्वोदेवस्यनेतुर्मर्त्तो
वुरीतसख्यम्॥विश्वोरायऽइषुध्यतिद्युम्नंवृणीतपुष्यसेस्वाहा॥२९॥आब्र
ह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराजन्यः॥शूरऽइषव्योतिव्याधीमहा

रथेजायताम्॥२०॥दोग्ध्रीधेनुर्वोढानड्वानाशुःसप्तिःपुरंधिर्योषा॥जिष्णूरथेष्ठाः
सभेयोयुवास्ययजमानस्यवीरोजायताम्॥२१॥निकामेनिकामेनःपर्जन्योवर्ष
तुफलवत्योनःओषधयःपच्यंताम्॥योगक्षेमोनःकल्पताम्॥२२॥प्राणायस्वाहा
पानायस्वाहाव्यानायस्वाहा॥चक्षुषेस्वाहाश्रोत्रायस्वाहावाचेस्वाहामनसेस्वाहा॥
॥२३॥प्राच्यैदिशेस्वाहार्वाच्यैदिशेस्वाहादक्षिणायैदिशेस्वाहार्वाच्यैदिशेस्वाहा॥
प्रतीच्यैदिशेस्वाहार्वाच्यैदिशेस्वाहोदीच्यैदिशेस्वाहार्वाच्यैदिशेस्वाहा॥ऊर्ध्वा
यैदिशेस्वाहार्वाच्यैदिशेस्वाहावाच्यैदिशेस्वाहार्वाच्यैदिशेस्वाहा॥२४॥अद्भ्यः
स्वाहावार्भ्यःस्वाहोदकायस्वाहातिष्ठंतीभ्यःस्वाहास्रवंतीभ्यःस्वाहास्यंदमाना
भ्यःस्वाहा॥कूप्याभ्यःस्वाहासूद्याभ्यःस्वाहा धार्य्याभ्यःस्वाहार्णवायस्वाहासमु

द्रायस्वाहा।सरिरायस्वाहा॥२५॥वातायस्वाहा।धूमायस्वाहा।ऽभ्रायस्वाहा।मेघायस्वा
हा।विद्योतमानायस्वाहा।स्तनयतेस्वाहा॥अवस्फूर्जतेस्वाहा।वर्षतेस्वाहा।ऽववर्ष
तेस्वाहा।उग्रंवर्षतेस्वाहा।शीघ्रंवर्षतेस्वाहा।उद्गृह्णतेस्वाहा।उद्गृहीतायस्वाहा।प्रुष्णतेस्वा
हा।शीकायतेस्वाहा।प्रुष्वाभ्यःस्वाहा।ह्रादुनीभ्यःस्वाहा।नीहारायस्वाहा॥२६॥अग्न
येस्वाहा।सोमायस्वाहा।इन्द्रायस्वाहा।पृथिव्यैस्वाहा।अन्तरिक्षायस्वाहा॥दिवेस्वाहा।दिग्भ्यः
२८ स्वाहा।आशाभ्यःस्वाहा।उर्व्यैदिशेस्वाहा।अर्वाच्यैदिशेस्वाहा॥२७॥नक्षत्रेभ्यःस्वाहा।नक्ष २८
त्रियेभ्यःस्वाहा।अहोरात्रेभ्यःस्वाहा।अर्द्धमासेभ्यःस्वाहा।मासेभ्यःस्वाहा।ऋतुभ्यः
स्वाहा।आर्तवेभ्यःस्वाहा।संवत्सरायस्वाहा।द्यावापृथिवीभ्यांस्वाहा॥२८॥चं
द्रायस्वाहा।सूर्यायस्वाहा।रश्मिभ्यःस्वाहा।वसुभ्यःस्वाहा।रुद्रेभ्यःस्वाहा।आदि

सेभ्यःस्वाहामरुद्भ्यःस्वाहाविश्वेभ्योदेवेभ्यःस्वाहा॥३९॥मूलेभ्यःस्वाहाशाखाभ्यः
स्वाहावनस्पतिभ्यःस्वाहा।पुष्पेभ्यःस्वाहाफलेभ्यःस्वाहौषधीभ्यःस्वाहा॥४०॥पृ
थिव्यैस्वाहांतरिक्षायस्वाहादिवेस्वाहासूर्यायस्वाहा।चंद्रायस्वाहानक्षत्रेभ्यः
स्वाहाद्भ्यःस्वाहौषधीभ्यःस्वाहा।वनस्पतिभ्यःस्वाहापरिप्लवेभ्यःस्वाहाचराच
रेभ्यःस्वाहासरीसृपेभ्यःस्वाहा॥४१॥असवेस्वाहावसवेस्वाहाविभुवेस्वाहावि
वस्वतेस्वाहा।गणश्रियेस्वाहागणपतयेस्वाहाभिभुवेस्वाहाधिपतयेस्वाहा॥
४२॥शूषायस्वाहासंसर्पायस्वाहाचंद्रायस्वाहाज्योतिषेस्वाहा।मलिम्लुचा
यस्वाहादिवापतयतेस्वाहा॥४३॥मधवेस्वाहामाधवायस्वाहाशुक्रायस्वाहा
शुचयेस्वाहा।नभसेस्वाहानभस्यायस्वाहेषायस्वाहोर्जायस्वाहा।सहसेस्वा

हासहस्यायस्वाहातपसेस्वाहातपस्यायस्वाहाꣳहसस्पतयेस्वाहा॥४४॥वा
जायस्वाहाप्रसवायस्वाहापिजायस्वाहाक्रतवेस्वाहा।स्वःस्वाहामूर्ध्नेस्वाहा
व्यश्नुविनेस्वाहा।अंत्यायस्वाहांत्यायनायस्वाहाभौवनायस्वाहाभुवनस्यप
तयेस्वाहा।धिपतयेस्वाहाप्रजापतयेस्वाहा॥४५॥आयुर्यज्ञेनकल्पताꣳ
स्वाहाप्राणोयज्ञेनकल्पताꣳस्वाहापानोयज्ञेनकल्पताꣳस्वाहाव्यानोयज्ञेन
कल्पताꣳस्वाहा।उदानोयज्ञेनकल्पताꣳस्वाहासमानोयज्ञेनकल्पताꣳस्वाहा
चक्षुर्यज्ञेनकल्पताꣳस्वाहाश्रोत्रंयज्ञेनकल्पताꣳस्वाहा।वाग्यज्ञेनकल्पताꣳ
स्वाहामनोयज्ञेनकल्पताꣳस्वाहात्मायज्ञेनकल्पताꣳस्वाहापृष्ठंयज्ञेनकल्प
ताꣳस्वाहा।ब्रह्मयज्ञेनकल्पताꣳस्वाहायज्ञोयज्ञेनकल्पताꣳस्वाहाज्योतिर्य

ज्ञेनकल्पतांस्वाहासर्वयज्ञेनकल्पतांस्वाहा॥४६॥एकस्मैस्वाहाद्वाभ्यां
स्वाहाशतायस्वाहैकशतायस्वाहा॥व्युष्ट्यैस्वाहास्वर्गायस्वाहा॥४७॥
एकविंशतिदशानुवाकेषुसप्तचत्वारिंशत्॥तिस्रोसिताषलेषट्॥चतुर्विंश
तिमोध्यायः॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७॥७
हरिः॥ॐ॥श्रमू॥हिरंण्यगर्भःसमवर्त्तताग्रेभूतस्यजातःपतिरेकआसीत्॥
सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम॥१॥उपयामगृहीतो
सिप्रजापतयेत्वाजुष्टंगृह्णाम्येषतेयोनिःसूर्यस्तेमहिमा॥यस्तेहन्संवत्स
रेमहिमासंबभुवयस्तेवायावंतरिक्षेमहिमासंबभूव॥यस्ते दिविसूर्ये
महिमासंबभूवतस्मैतमहिम्नेप्रजापतयेस्वाहादेवेभ्यः॥२॥ यःप्राणतो

न्निमिषतो महित्वैक ऽइद्राजा जगतो बभूव ॥ य ऽईशे ऽअस्य द्विपदश्चतुष्पदः क
स्मै देवाय हविषा विधेम ॥३॥ उपयामगृहीतोसि प्रजापतये त्वा जुष्टं गृह्णाम्येष
ते योनिश्चन्द्रमास्ते महिमा । यस्ते रात्रौ संवत्सरे महिमा संबभूव यस्ते पृथि
व्यामग्नौ महिमा संबभूव । यस्ते नक्षत्रेषु चन्द्रमसि महिमा संबभूव तस्मै ते
महिम्ने प्रजापतये देवेभ्यः स्वाहा ॥४॥ युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थु
षः ॥ रोचन्ते रोचना दिवि ॥५॥ युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे ॥ शोणा
धृष्णू नृवाहसा ॥६॥ यद्वातो ऽअपो ऽअगनीगन्प्रियामिन्द्रस्य तन्वम् ॥ ए
तꣳस्तोतरनेन पथा पुनरश्वमावर्त्तयासि नः ॥७॥ वसवस्त्वाञ्जन्तु गायत्रे
ण छन्दसा रुद्रास्त्वाञ्जन्तु त्रैष्टुभेन छन्दसा ॥ आदित्यास्त्वाञ्जन्तु जागतेन छं

दृसा।।८।।भूर्भुवःस्वर्ल्लाजीँछाचीन्यवेगव्ये।।एतदन्नमत्तदेवाःएतदन्नमद्धि
प्रजापते।।९।।कस्विदेकाकीचरतिकउस्विज्जायतेपुनः।।किंस्विद्धिमस्य
भेषजंकिंम्वावपनंमहत्।।१०।।सूर्यःएकाकीचरतिचंद्रमाजायतेपुनः।।अ
ग्निर्हिमस्यभेषजंभूमिरावपनंमहत्।।११।।कास्विदासीत्पूर्वचित्तिःकिंस्वि
दासीद्बृहद्वयः।।कास्विदासीत्पिलिप्पिला।कास्विदासीत्पिशंगिला।।१२।।
द्यौरासीत्पूर्वचित्तिरश्वआसीद्बृहद्वयः।।अविरासीत्पिलिप्पिलारात्रिरा
सीत्पिशंगिला।।१३।।वायुष्ट्वापचतैरवत्वसितग्रीवश्छागैः।।न्यग्रोधश्च
मसैःशल्मलिर्वृद्ध्या।।१४।।एषस्यराथ्योवृषापड्भिश्चतुर्भिरेदगन्।।ब्रह्मा
कृष्णश्चनोवतुनमोग्नये।।१५।।संशितोरश्मिनारथःसंशितोरश्मिना

न्यः॥सॐभिलितोऽश्वःप्रसुनात्रंग्नासोमपुरोगवः॥१६॥स्वयंवाजिंस्तन्वंकल्प
यस्वस्वयंयजस्वस्वयंजुषस्व॥महिमातेन्येननसन्नशे॥१७॥नवाउएतन्म्रि
यसेनरिष्यसिदेवाँ॥ऽइदेषिपथिभिःसुगेभिः॥यत्रासतेसुकृतोयत्रतेययुः
स्तत्रत्वादेवःसवितादधातु॥१८॥अग्निःपशुरासीत्तेनायजंतसऽएतंलो
कमजयद्यस्मिन्नग्निः॥सतेलोकोभविष्यतितंजेष्यसिपिबैताऽअपः॥वा
युःपशुरासीत्तेनायजंतसऽएतंलोकमजयद्यस्मिन्वायुः॥सतेलोकोभ
२१ विष्यतितंजेष्यसिपिबैताऽअपः॥सूर्यःपशुरासीत्तेनायजंतसऽएतंलोकं २१
मजयद्यस्मिन्सूर्यः॥सतेलोकोभविष्यतितंजेष्यसिपिबैताऽअपः॥१९॥
प्राणा२ प्राणायस्वाहापानायस्वाहाव्यानायस्वाहा॥अंबेऽअंबिकेऽबा

लिकेनमानयतिकश्चन॥ससस्त्यश्वकःसुभद्रिकांकांपीलवासिनीम्॥२०
गणानांत्वागणपतिꣳहवामहेप्रियाणांत्वाप्रियपतिꣳहवामहे॥निधी
नांत्वानिधिपतिꣳहवामहेवसोमम॥२१॥आहमजानिगर्भधमात्वमजासि
गर्भधम॥ताउभौचतुरःपदःसंप्रसारयाव॥स्वर्गेलोकेप्रोर्णुवाथांवृषावाजी
रेतोधारेतोदधातु॥२२॥उत्सक्थ्याऽअवगुदंधेहिसमंजिंचारयावृषन्॥य
स्त्रीणांजीवभोजनः॥२३॥यकासकौशकुंतिकाआहलगितिवंचति॥आहं
तिगभेपसोनिगल्गलीतिधारका॥२४॥यकोसकौशकुंतकःआहलगिति
वंचति॥विवक्षतःइवतेमुखमध्वर्योमानस्त्वमभिभाषथाः॥२५॥मातात्वेतेपि
ताचतेग्रंवृक्षस्यरोहतः॥प्रतिलामीतितेपितागभेमुष्टिमतꣳसयत्॥२६॥मा
४८

ताच्चतेपिताचतेग्रेवृक्षस्यक्रीळतः॥विवक्षतऽइवतेमुखंब्रह्मन्मात्वँवदोबहु॥२७
ऊर्ध्वामेनामुच्छ्रापयगिरौभारंहरन्निव॥अथास्यैमध्यमेधतांशीतेवाते
पुनन्निव॥२८॥ऊर्ध्वमेनमुच्छ्रयताद्गिरौभारंहरन्निव॥अथास्यमध्यमेजतु
शीतेवातेपुनन्निव॥२९॥यदस्याऽअंहुभेद्याः कृधुस्थूलमुपातसत्॥मुष्काऽ
इदस्याऽएजतोगोशफेशकुलाऽइव॥३०॥यद्देवासोललामगुंप्रविष्टीमिनमा
१० विषुः॥सक्थ्नादेदिश्यतेनारीसत्यस्याक्षिभुवोयथा॥३१॥यद्धरिणोयवमत्ति
नपुष्टंपशुमन्यते॥शूद्रायदर्यजारानपोषायधनायति॥३२॥यद्धरिणोयव १०
मत्तिनपुष्टंबहुमन्यते॥शूद्रोयदर्यायैजारोनपोषमनुमन्यते॥३३॥दधिक्रा
व्णोऽअकारिषंजिष्णोरश्वस्यवाजिनः॥सुरभिनोमुखाकरत्प्रणऽआयुं

षितामूर्द्ध्ना॥३४॥गायत्रीत्रिष्टुब्जगत्यनुष्टुप्पंक्त्यासह।बृहत्युष्णिहाककुप्सू
चीभिःशम्यंतुत्वा॥३५॥द्विपदायाःश्चतुष्पदास्त्रिपदायाश्चषट्पदाः॥विछंदायाश्च
सछंदाःसूचिभिःशम्यंतुत्वा॥३६॥महानाम्न्योरेवत्योविश्वाआशाःप्रभु
वरीः॥मैघीर्विद्युतोवाचःसूचीभिःशम्यंतुत्वा॥३७॥नार्यस्तेपत्न्योलोमवि
चिन्वंतुमनीषया॥देवानांपत्न्योदिशःसूचीभिःशम्यंतुत्वा॥३८॥रजताहरि
णीःसीसायुजोयुज्यंतेकर्मभिः॥अश्वस्यवाजिनस्त्वचिसिमाःशम्यंतुशम्यंतीः॥
३९॥कुविदंगयवमंतोयवंचिद्यथादांत्यनुपूर्वंवियूय।इहेहैषांकृणुहिभो
जनानियेबर्हिषोनमउक्तिंयजंति॥४०॥कस्त्वाछ्यतिकस्त्वाविशास्तिकस्ते
गात्राणिशम्यति।कउतेशमिताकविः॥४१॥ऋतवस्तऋतुथापर्वशमिता

रोविशासतु॥ संवत्सरस्यतेजसाशमीभिः शम्यंतुत्वा॥४२॥ अर्द्धमासाः परूंषिते

मासाः आछ्यंतुशम्यंतः॥ अहोरात्राणिमरुतोविलिष्टंसूदयंतुते॥४३॥ दै

व्याः अध्वर्यवस्त्वाछ्यंतुविचशासतु॥ गात्राणिपर्वशस्तेसिमाः कृण्वंतुशम्यं

तीः॥४४॥ द्यौस्तेपृथिव्यंतरिक्षंवायुःछिद्रंपृणातुते॥ सूर्यस्तेनक्षत्रैः सहलो

कंकृणोतुसाधुया॥४५॥ शंतेपरेभ्योगात्रेभ्यः शमस्त्ववरेभ्यः॥ शमस्थभ्यो

मज्जभ्यः शम्वस्तुतन्वैतव॥४६॥ कस्विदेकाकीचरतिकउस्विज्जायतेपुनः॥ २

२१ किंस्विद्धिमस्यभेषजंकिम्वावपनंमहत्॥४७॥ सूर्यएकाकीचरतिचंद्रमा

जायतेपुनः॥ अग्निर्हिमस्यभेषजंभूमिरावपनंमहत्॥४८॥ किंस्वित्सूर्य

समंज्योतिः किंसमुद्रसमंसरः॥ किंस्वित्पृथिव्यैवर्षीयः कस्यमात्रानवि

द्यते।।४९।।ब्रह्मसूर्यसमंज्योतिर्द्यौःसमुद्रसमꣳसरः।।इंद्रःपृथिव्यैवर्षीयान्गो।
स्तुमात्रानविद्यते।।५०।।पृच्छामित्वाचितयेदेवसखयदित्वमत्रमनसाजगंथ।
येषुविष्णुस्त्रिषुपदेष्वेष्टस्तेषुविश्वंभुवनमाविवेशा३।।५१।।अपितेषुत्रिषुपदेष्व
स्मियेषुविश्वंभुवनमाविवेश।।सद्यःपर्येमिपृथिवीमुतद्यामेकेनांगेनदिवोऽ
अस्यपृष्ठं।।५२।।केष्वंतःपुरुषआविवेश।।कान्यंतःपुरुषेऽअर्पितानि।एतद्ब्रह्म
न्नुपवल्हामसित्वाकिꣳस्विन्नःप्रतिवोचास्यत्र।।५३।।पंचस्वंतःपुरुषऽआवि
वेशतान्यंतःपुरुषेऽअर्पितानि।।एतत्त्वात्रप्रतिमन्वानोऽअस्मिनमायया।भवस्यु
त्तरोमत्।।५४।।कास्विदासीत्पूर्वचित्तिःकिꣳस्विदासीद्बृहद्वयः।।कास्विदासी
त्पिलिप्पिला।कास्विदासीत्पिशंगिला।।५५।।द्यौरासीत्पूर्वचित्तिरश्वऽआसीद्बृ

हृद्वयः॥ अविरासीत्पिलिप्पिला रात्रिरासीत्पिशंगिला॥५६॥ काऽईमरेपिशं
गिला काऽईं कुरूपिशंगिला॥ कईमास्कंदमर्षति कऽईं पथां विसर्पति॥५७॥
अजारे पिशंगिला श्वावित्कुरूपिशंगिला॥ शशऽआस्कंदमर्षत्यहिः पंथां
विसर्पति॥५८॥ कत्यस्य विष्ठाः कत्यक्षराणि कति होमासः कतिधा समिद्धः॥
यज्ञस्य त्वा विदथा पृच्छमत्र कति होतारऽऋतुशो यजंति॥५९॥ षडस्य वि
ष्ठाः शतमक्षराण्यशीतिर्होमाः समिधो ह तिस्रः॥ यज्ञस्य ते विदथा प्रब्रवी
३२ मि सप्त होतारऽऋतुशो यजंति॥६०॥ कोऽअस्य वेद भुवनस्य नाभिं को द्या ३२
वापृथिवीऽअंतरिक्षम्॥ कः सूर्यस्य वेद बृहतो जनित्रं को वेद चंद्रमसं
यतोजाः॥६१॥ वेदाहमस्य भुवनस्य नाभिं वेद द्यावापृथिवीऽअंतरिक्षम्॥

वेदसूर्यस्यबृहतोजनित्रमथोवेदचंद्रमसंयतोजाः॥६२॥पृच्छामित्वापरमंतं
पृथिव्याःपृच्छामियत्रभुवनस्यनाभिः॥पृच्छामित्वावृष्णोअश्वस्यरेतःपृच्छा
मिवाचःपरमंव्योम॥६३॥इयंवेदिःपरोअंतःपृथिव्याअयंयज्ञोभुवनस्यना
भिः॥अयꣳसोमोवृष्णोअश्वस्यरेतोब्रह्मायंवाचःपरमंव्योम॥६४॥सुभूःस्व
यंभूःप्रथमोन्तर्महत्यर्णवे॥दधेहगर्भमृत्वियंयतोजातःप्रजापतिः॥६५॥होता
यक्षत्प्रजापतिꣳसोमस्यमहिम्नः॥जुषतांपिबतुसोमꣳहोतर्यज॥६६॥प्रजाप
तेनत्वदेतान्यन्योविश्वारूपाणिपरिताबभूव॥यत्कामास्तेजुहुमस्तन्नोअस्तु
वयꣳस्यामपतयोरयीणाम्॥६७॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ
स्थानानुवाकेषु॥छ॥एवंत्रविंशतितमोध्यायः॥छ॥हरिःॐ॥श्री॥अश्वस्तूपरोगोमृगस्तेप्राजा

पुस्याः कृष्णग्रीवः आग्नेयोरराटे। पुरस्तात्सारस्वती मेष्यधस्ताद्धन्वोः ॥१॥ आश्विना
अधोरामौ बाह्वोः सौमापौष्णः श्यामो नाभ्यां सौर्ययामौ श्वेतश्च कृष्णश्च पार्श्व
योः ॥२॥ त्वाष्ट्रौ लोमशसक्थौ सक्थ्योर्वायव्यः श्वेतः पुच्छ इंद्रायस्वपस्याय वेहद्वैष्ण
वो वामनः ॥ रोहितो धूम्ररोहितः कर्कंधुरोहितस्ते सौम्या बभ्रुररुणबभ्रुः शुकबभ्रु
स्ते वारुणाः ॥३॥ शितिरंध्रोन्यतः शितिरंध्रः समंतशितिरंध्रस्ते सावित्राः शितिबा
हुरन्यतः शितिबाहुः समंतशितिबाहुस्ते बार्हस्पत्याः ॥ पृषती क्षुद्रपृषती स्थूल
पृषती ता मैत्रावरुण्यः ॥४॥ शुद्धवालः सर्वशुद्धवालो मणिवालस्त आश्विनाः ॥
श्येतः श्येताक्षोरुणास्ते रुद्राय पशुपतये कर्णा यामाः ॥५॥ अवलिप्ता रौद्रा न
भोरूपाः पार्जन्याः ॥ पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः ॥६॥ फल्गूर्लो

हितोर्णीपलक्षीताःसारस्वत्यः॥प्लीहाकर्णःशुंठाकर्णोध्यालोहकर्णस्तेत्वा
ष्ट्राः॥७॥कृष्णग्रीवःशितिकक्षोंजिसक्थस्तऐंद्राग्नाः॥कृष्णांजिरल्पांजि
र्महांजिस्तउषस्याः॥८॥शिल्पावैश्वदेव्योरोहिण्यस्त्र्यवयोवाचेविज्ञाता
अदित्यै॥सरूपाधात्रेवत्सतर्योदेवानांपत्नीभ्यः॥९॥कृष्णग्रीवाआग्नेयाः
शितिभ्रवोवसूनांरोहितारुद्राणां॥श्वेताऽअवरोकिणआदित्यानांन
भोरूपाःपार्जन्याः॥१०॥उन्नतऋषभोवामनस्तऐंद्रावैष्णवाऽउन्नतःशिति
बाहुःशितिपृष्ठस्तऐंद्राबार्हस्पत्याः॥शुकरूपावाजिनाःकल्माषाऽआग्नि
मारुताःश्यामाःपौष्णाः॥११॥एताऽऐंद्राग्नाद्विरूपाअग्नीषोमीयावाम
नाअनड्वाहआग्नावैष्णवाः॥वशामैत्रावरुण्योन्यतऽएन्योमैत्र्यः॥१२॥धू

ष्याग्रीवाऽआग्नेयाबभ्रवःसौम्याःश्वेतावायव्याऽअविज्ञाताऽअदित्यैसरूपा
धात्रेवत्सतर्योदेवानांपत्नीभ्यः॥१३॥कृष्णाभौमाधूम्राऽआंतरिक्षाबृहंतो
दिव्याः॥शबलावैद्युताःसिध्मास्तारकाः॥१४॥धूम्रान्वसंतायालभतेश्वे
तान्ग्रीष्मायकृष्णान्वर्षाभ्योरुणांछरदेपृषतोहेमंतायपिशंगांछिशि
राय॥१५॥त्र्यवयोगायत्र्यैपंचावयस्त्रिष्टुभेदित्यवाहोजगत्यैत्रिवत्साऽअ
नुष्टुभेतुर्यवाहउष्णिहे॥१६॥पष्ठवाहोविराजउक्षाणोबृहत्याऽऋषभाःक
कुभेऽनड्वाहःपंक्त्यैधेनवोतिछंदसे॥१७॥कृष्णग्रीवाऽआग्नेयाबभ्रवःसौ
म्याऽउपध्वस्ताःसावित्रावत्सतर्यःसारस्वत्यःश्यामाःपौष्णाः॥पृश्नयोमा
रुताबहुरूपावैश्वदेवावशाद्यावापृथिवीयाः॥१८॥उक्ताःसंचराऽएताऐन्द्रा

ग्नाः॥ कृष्णावारुणाः पृश्नयोमारुताः कायास्तूपराः॥१९॥ अग्नयेनीकवतेप्रथ
मजानालभतेमरुद्भ्यः सांतपनेभ्यः सवात्यान्मरुद्भ्योगृहमेधिभ्योबष्किहा
न्मरुद्भ्यः क्रीडिभ्यः संसृष्टान्मरुद्भ्यः स्वतवद्भ्योनुसृष्टान्॥२०॥ उक्ताः
संचराऽएताऽऐंद्राग्नाः॥ प्राशृंगामाहिंद्राबहुरूपावैश्वकर्मणाः॥२१॥ धूम्राब
भ्रुनीकाशाः पितृणांसोमवतांबभ्रवोधूम्रनीकाशाः पितृणांबर्हिषदां॥
कृष्णाबभ्रुनीकाशाः पितृणामग्निष्वात्तानांकृष्णाः पृषंतस्त्रैयंबकाः॥२२॥
उक्ताः संचराऽएताः शुनासीरीयाः॥ श्वेतावायव्याः श्वेताः सौर्याः॥२३॥ वसंता
यकपिंजलानालभतेग्रीष्मायकलविंकान्वर्षाभ्यस्तित्तिरीन्छरदेवर्तिकाः॥
हेमंतायककरान्छिशिरायविककरान्॥२४॥ समुद्रायशिशुमारानालभते

पर्जन्यायमंडूकानद्भ्योमत्स्यान्॥मित्रायकुलीपयान्वरुणायनाक्रान्॥२५॥सो
मायहंसानालभतेवायवेबलाकाइंद्राग्निभ्यांक्रुंचान्॥मित्रायमद्गून्वरुणाय
चक्रवाकान्॥२६॥अग्नयेकुटरूनालभतेवनस्पतिभ्यउलूका॥नग्नीषोमाभ्यां
चाषान्॥अश्विभ्यांमयूरान्मित्रावरुणाभ्यांकपोतान्॥२७॥सोमायलबानाल
भतेत्वष्ट्रेकौलीकान्गोषादीर्देवानांपत्नीभ्यः॥कुलीकादेवजामिभ्योग्नयेगृहप
तयेपारुष्णान्॥२८॥अन्हेपारावतानालभतेरात्र्यैसीचापूरहोरात्रयोःसंधि
भ्योजतूः॥मासेभ्योदात्यौहान्संवत्सरायमहतःसुपर्णान्॥२९॥भूम्याआखू
नालभतेंतरिक्षायपांक्त्रान्दिवेकशान्॥दिग्भ्योनकुलान्बभ्रुकानवांतरदि
शाभ्यः॥३०॥वसुभ्यऋश्यानालभतेरुद्रेभ्योरुरूनादित्येभ्योन्यंकून्॥वि

श्वेभ्यो देवेभ्यः पृषतान्त्साध्येभ्यः कुलुंगान् ॥२१॥ ईशानाय परस्वत ऽआलभते
मित्राय गौरान्वरुणाय महिषान् ॥ बृहस्पतये गवयाँ॥ स्त्वष्ट्र ऽउष्ट्रान् ॥२२॥ प्रजा
ञ्ह पतये पुरुषान्हस्तिन ऽआलभते वाचे प्लुषीन् ॥ चक्षुषे मशकाञ्छ्रोत्राय भृंगाः ॥
२३ ॥ प्रजापतये च वायवे च गोमृगो वरुणायारण्यो मेषो यमाय कृष्णो मनुष्यरा
जाय मर्कटः ॥ शार्दूलाय रोहिदृषभाय गवयी क्षिप्रश्येनाय वर्तिका नीलंगोः
कृमिः समुद्राय शिशुमारो हिमवते हस्ती ॥२४॥ मयुः प्राजापत्य ऽउलो हलि
क्ष्णो वृषदंशस्ते धात्रे दिशां कंको धुंक्षाग्नेयी ॥ कलविंको लोहिताहिः पु
ष्करसादस्ते त्वाष्ट्रा वाचे क्रुंचः ॥२५॥ सोमाय कुलुंग ऽआरण्योऽजो नकुलः शका
ते पौष्णाः क्रोष्टा मायोरिंद्रस्य गौरमृगः ॥ पिद्वो न्यंकुः कक्कटस्तेनुमत्यै प्रतिश्रुत्का ८

१६

यैचक्रवाकः॥२६॥सौरीबलाकाशार्गःसृजयःशयांडकस्तेमैत्राःसरस्वत्यैशारिः
पुरुषवाक्श्वाविद्भौमी॥शार्दूलोवृकःपृदाकुस्तेमन्यवेसरस्वतेशुकःपुरुषवाक्॥
२७॥सुपर्णःपार्जन्यआतिर्वाहसोदर्विदातेवायवेबृहस्पतयेवाचस्पतये
पैंगराजोलजःआंतरिक्षः॥प्लवोमद्गुर्मत्स्यस्तेनदीपतयेद्यावापृथिवीयःकू
र्मः॥२८॥पुरुषमृगश्चंद्रमसोगोधाकालकादार्वाघाटस्तेवनस्पतीनांकृक
वाकुःसावित्रोहंसोवातस्य॥नाक्रोमकरःकुलीपयस्तेकूपारस्यह्रियैश
ल्यकः॥२९॥एण्यह्नोमंडूकोमूषिकातित्तिरिस्तेसर्पाणांलोपाशआश्वि
नःकृष्णोरात्र्यै॥ऋक्षोजतूःसुषिलीकातइतरजनानांजहकावैष्णवी॥३०
अन्यवापोर्द्धमासानामृश्योमयूरःसुपर्णास्तेगंधर्वाणामपामुद्रोमासां

१६

कश्यपः ॥ रोहित्कुंडृणाचीगोलत्तिकातेप्सरसांमृत्यवेसितः ॥४१॥ वर्षाहूर्ऋ
तूनामाखुःकशोमांथालस्तेपितॄणांबलायाजगरोवसूनांकपिंजलः ॥ कपो
तउलूकःशशस्तेनिर्ऋत्यैवरुणायारण्योमेषः ॥४२॥ श्वित्रऽआदित्यानामु
ष्ट्रोघृणीवान्वार्ध्रीनसस्तेमत्याऽअरण्यायसृमरोरुरूरौद्रः ॥ क्वयिःकुट
रुर्दात्यौहस्तेवाजिनांकामायपिकः ॥४३॥ खड्गोवैश्वदेवश्वाकृष्णःकर्णोगर्द
भस्तरक्षुस्तेरक्षसामिंद्रायसूकरः ॥ सिंहोमारुतःकृकलासःपिप्पकाश
कुनिस्तेशरव्यायैविश्वेषांदेवानांपृषतः ॥४४॥ अष्टनुवाकेषुषडविंशतिमो
ध्यायः ॥२६॥ ॥२६॥ ॥२६॥ हरिः ॐ ॥ शादंदद्भिरवकांदंत
मूलैर्मृदंबर्स्वैस्तेगांदंष्ट्राभ्यांसरस्वत्याऽअग्रजिह्वंजिह्वायाऽउत्सादं।

अवक्रंदेनतालुवाजꣳहनुभ्यामपऽआस्येनवृषणमांडाभ्याम्॥१॥आदित्या
न्श्मश्रुभिःपंथानंभ्रूभ्यांद्यावापृथिवीवर्त्तोभ्यांविद्युतंकनीनकाभ्याम्॥शुक्ला
यस्वाहाकृष्णायस्वाहा।पार्याणिपक्ष्माण्यवार्याऽइक्षवोवार्याणिपक्ष्माणि
पार्याऽइक्षवः॥२॥वातंप्राणेनापानेननासिकेऽउपयाममधरेणौष्ठेनसदु
त्तरेण।प्रकाशेनांतरमनूकाशेनबाह्यंनिवेष्यंमूर्ध्नास्तनयित्नुंनिर्बाधेना

२७ शनिंमस्तिष्केणविद्युतंकनीनकाभ्याम्॥३॥कर्णाभ्याꣳश्रोत्रꣳश्रोत्रा २७

भ्यांकर्णौतेदनीमधरकंठेनापःशुष्ककंठेनचित्तंमन्याभिः॥अदितिꣳशी
र्ष्णानिर्ऋतिंनिर्जर्जल्पेनशीर्ष्णासंक्रोशैःप्राणान्रेष्माणꣳस्तुपेन॥४॥
मशकान्केशैरिंद्रꣳस्वपसावहेनबृहस्पतिꣳशकुनिसादेनकूर्मान्॥आ

फैराक्रमणꣳस्थूराभ्यामृक्षलाभिःकपिंजलान्॥५॥जवंजंघाभ्यामध्वानं
बाहुभ्यांजांबीलेनारण्यमग्निमतिरुग्भ्याम्॥पूषणंदोर्भ्यामश्विनावꣳ
साभ्याꣳरुद्रꣳरोराभ्याम्॥६॥अग्नेःपक्षतिर्वायोर्निपक्षतिरिन्द्रस्यतृतीया
पांचतुर्थी॥अदित्यैपंचमीन्द्राण्यैषष्ठीमरुताꣳसप्तमीबृहस्पतेरष्टमी॥
ऽअर्यम्णोनवमीधातुर्दशमीन्द्रस्यैकादशीवरुणस्यद्वादशीयमस्यत्रयो
दशी॥७॥इंद्राग्न्योःपक्षतिःसरस्वत्यैनिपक्षतिर्मित्रस्यतृतीयासोमस्य
चतुर्थी॥निर्ऋत्यैपंचम्यग्नीषोमयोःषष्ठीसर्पाणाꣳसप्तमीविष्णोरष्ट
मी॥पूष्णोनवमीत्वष्टुर्दशमीन्द्रस्यैकादशीवरुणस्यद्वादशीयम्यैत्रयोदशी॥
द्यावापृथिव्योर्दक्षिणंपार्श्वंविश्वेषांदेवानामुत्तरं॥८॥मरुताꣳस्कंधावि

येषांदेवानांप्रथमाकीकसारुद्राणांद्वितीयादित्यानांतृतीयावायोःपुछ
मग्नीषोमयोर्भासदौक्रुंचौश्रोणिभ्यामिंद्राबृहस्पतीऊरुभ्यांमित्रावरु
णाःअल्गाभ्यामाक्रमणंस्थूराभ्यांबलंकुष्ठाभ्यां॥९॥पूषणंवनिष्ठुनांधा
हीन्स्थूलगुदयासर्पान्गुदाभिर्विह्रुतःआंत्रैरपोवस्तिनावृषणमांडाभ्यांवा
जिनंशेपेनप्रजांरेतसाचाषान्पित्तेनप्रदरान्पायुनाकूश्मान्छकपिं
२८ डैः॥१०॥इंद्रस्यक्रोडोदित्यैपाजस्यंदिशांजत्रवोदित्यैभसत्जीमूतान्हृ २८
दयोपशेनांतरिक्षंपुरीतता॥११॥नभउदर्येणचक्रवाकौमतस्नाभ्यां
दिवंवृक्काभ्यांगिरीन्प्लाशिभिः॥उपलान्प्लीन्हावल्मीकान्क्लोमभिर्ग्लौभि
र्गुल्मान्हिराभिःस्रवंतीः॥ह्रदान्कुक्षिभ्यांसमुद्रमुदरेणवैश्वानरंभस्मना॥

१२॥विष्वंस्तिन्नाभ्याघृतंरसेनापोयूष्णामरीचीर्विप्रुड्भिर्नीहारमूष्मणा
शीनंवसयाप्रुष्वाःअश्रुभिः॥ह्रादुनीर्दूषीकाभिरस्नारक्षाऽसिचित्राण्यं
गैर्नक्षत्राणिरूपेणपृथिवींत्वचाजुंबकायस्वाहा॥१३॥हिरण्यगर्भःसमव
र्त्तताग्रेभूतस्यजातःपतिरेकआसीत्॥सदाधारपृथिवींद्यामुतेमांकस्मै
देवायहविषाविधेम॥१४॥यःप्राणतोनिमिषतोमहित्वैकऽइद्राजाजगतो
बभूव॥यईशेऽअस्यद्विपदश्चतुष्पदःकस्मैदेवायहविषाविधेम॥१५॥
यस्येमेहिमवंतोमहित्वायस्यसमुद्रंरसयासहाहुः॥यस्येमाःप्रदिशो
यस्यबाहूकस्मैदेवायहविषाविधेम॥१६॥यःआत्मदाबलदायस्यविश्वः
उपासतेप्रशिषंयस्यदेवाः॥यस्यछायामृतंयस्यमृत्युःकस्मैदेवायहविषा

विधेम॥१७॥६॥ आनोभद्राःक्रतवोयंतुविश्वतोदब्धासोऽअपरीतासउद्भिदः॥
